अन्वयः—अद्रिवः–त्वम् गोमतः–बलस्य बिलम् अपावः देवाः तुज्यमानासः अबिभ्युषः त्वाम्–आविषुः ॥

पदार्थः—(अद्रिवः–त्वम्) हे अदीर्ण शक्ति वाले परमात्मन्! तू (गोमतः–बलस्य बिलम्) स्तुतिवाणी वाले संवृत स्थान—अन्तःकरण—मन के प्राण द्वार को (अपावः) खोल दे जिससे (देवाः) मुमुक्षुजन या देववृत्तियाँ—सद्वृत्तियाँ (तुज्यमानासः) कामादि पापों या पापवृत्तियों से पीड़ित हुए (अबिभ्युषः) निडर हुए (त्वाम्–आविषुः) तुझे प्राप्त हो सकें ॥ २ ॥

१२५२. **इन्द्रमीशानमोजसाभि स्तोमैरनूषत। सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ ३ ॥**

---

१. "धीराणां शश्वताम्" [अथर्व० २०.१२८.४]।

२. "आत्मा वै पूः" [श० ७.५.१.२१]।

पदपाठः— इन्द्रम् ईशानम् ओजसा अभिस्तोमैरनूषत सहस्रम् यस्य रातयः उत वा सन्ति भूयसीः ॥ ३ ॥

अन्वयः—ईशानम्-इन्द्रम् ओजसा स्तोमैः-अभि-अनूषत यस्य रातयः सहस्रं सन्ति उत वा भूयसीः ॥

पदार्थः—(ईशानम्-इन्द्रम्) हे उपासको! विश्व के स्वामित्व करने वाले ऐश्वर्यवान् परमात्मा की (ओजसा) आत्मबल के साथ (स्तोमैः-अभि-अनूषत) स्तुतिसमूहों द्वारा निरन्तर स्तुति करो (यस्य रातयः सहस्रं सन्ति) जिसके धन—तृप्तिकारक साधन सहस्रों हैं (उत वा) अपि च—और भी (भूयसीः) बहुतेरी लाखों प्रकार की दान प्रवृत्तियाँ—कृपा दृष्टियाँ हैं ॥ ३ ॥

इति नवमोऽध्यायः ॥ ९ ॥

अथ दशम अध्याय

प्रथम खण्ड

प्रथम तृच

ऋषिः—पराशरः (पर-विरोधी काम आदि को नष्ट करने वाला उपासक)॥
देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—त्रिष्टुप्॥

१२५३. अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः। वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः॥ १॥

पदपाठः— अक्रान्त्समुद्रःप्रथमेविधर्मन्॥ १॥

(देखो अर्थव्याख्या मन्त्र संख्या ५२९)

१२५४. मत्सि वायुमिष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः। मत्सि शर्धो मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव सोम॥ २॥

पदपाठः— मत्सि वायुम् इष्टये राधसे नः मत्सि मित्रा मि त्रा वरुणा पूयमानः मत्सि शर्द्धः मारुतम् मत्सि देवान् मत्सि द्यावा पृथिवीइति देव सोम॥ २॥

अन्वयः—सोमदेव पूयमानः नः–इष्टये राधसे वायुं मत्सि मित्रावरुणा मत्सि मारुतं शर्धः–मत्सि देवान् मत्सि द्यावापृथिवी मत्सि॥

पदार्थः—(सोमदेव) हे शान्तस्वरूप परमात्मदेव (पूयमानः) तू योगाभ्यास द्वारा साक्षात् हुआ (नः–इष्टये राधसे) हमारी आभ्युदयिक कामना के लिये तथा नैःश्रेयसिक—मोक्षसिद्धि के लिये (वायुं मत्सि) आयु को[1] हर्ष देने वाला बना[2] (मित्रावरुणा मत्सि) प्राण–अपान को[3] श्वास उच्छ्वास को हर्ष देने वाले कर दे (मारुतं शर्धः–मत्सि) प्राणों के बल[4] को—जीवन शक्ति हर्ष देने वाला बना (देवान् मत्सि) इन्द्रियों को हर्षप्रद बना (द्यावापृथिवी मत्सि) ज्ञानाधार मन को और रसाधार शरीर को[5] हर्ष देने वाला कर दे॥ २॥

---

१. ''आयुर्वा एष यद् वायुः'' [ऐ० आ० १.५]।
२. ''मत्सि मादय'' अन्तर्गतणिजर्थः, लेट् प्रयोगः।
३. ''प्राणापानौ मित्रावरुणौ'' [काठ० २९.२]।
४. ''शर्धः–बलनाम'' [निघं० २.९]।
५. ''यच्छरीरं सा पृथिवी'' [ऐ० आ० २.३.३]।

१२५५. महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्। अदधादिन्द्रे पवमान ओजोऽजनयत् सूर्ये ज्योतिरिन्दुः॥ ३॥

पदपाठः— महत्तत्सोमोमहिषश्चकार॥ ३॥

(देखो अर्थव्याख्या मन्त्र संख्या ५४२)

द्वितीय दशर्च

ऋषिः—आजीगर्तः शुनः शेपः (इन्द्रियभोगों की दौड़ में शरीरगर्त में गिरा उत्थान का इच्छुक)॥ देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री॥

१२५६. एष देवो अमर्त्यः पर्णवीरिव दीयते। अभि द्रोणान्यासदम्॥ १॥

पदपाठः— एषः देवः अमर्त्यः अ मर्त्यः पर्णवीः पर्ण वीः इव दीयते अभि द्रोणानि आसदम् आ सदम्॥ १॥

अन्वयः—एषः-अमर्त्यः-देवः पर्णवीः-इव द्रोणानि-अभि-आसदं दीयते॥

पदार्थः—(एषः-अमर्त्यः-देवः) यह अमर शान्तस्वरूप परमात्मदेव (पर्णवीः-इव) पक्षों से गति करने वाले पक्षी की भाँति (द्रोणानि-अभि-आसदं दीयते) द्रवण स्थानों—उपासक पात्रों के प्रति[1] प्राप्त होने को गति करता है[2] प्राप्त होता है॥ १॥

१२५७. एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे॥ २॥

पदपाठः— एषः विप्रैः वि प्रैः अभिष्टुतः अभि स्तुतः अपः देवः वि गाहते दधद्रत्नानिदाशुषे॥ २॥

अन्वयः—एषः-देवः विप्रैः-अभिष्टुतः अपः-विगाहते दाशुषे रत्नानि दधत्॥

पदार्थः—(एषः-देवः) यह द्योतमान सोम—शान्त परमात्मा (विप्रैः-अभिष्टुतः) मेधावी उपासकों द्वारा अभीष्ट स्तुति में लाया गया (अपः-विगाहते) उनकी श्रद्धाओं में विगाहन करता है[3] (दाशुषे रत्नानि दधत्) आत्मसमर्पी—श्रद्धावान् के लिये रमणीय अध्यात्म सुखैश्वर्यों को धारण कराने के हेतु॥ २॥

---

१. ''प्रजापतेर्वापात्रं यद्द्रोणकलशः'' [मै० ४.८.८]।

२. ''दीयते-गतिकर्मा'' [निघं० २.१४]।

३. ''आपः श्रद्धा'' [क० ४७.३]।

१२५८. एष विश्वानि वार्या शूरो यन्निव सत्त्वभिः। पवमानः सिषासति॥ ३॥

पदपाठः— एषः विश्वानि वार्या शूरः यन् इव सत्त्वभिः पवमानः सिषासति॥ ३॥

अन्वयः—एषः-शूरः सत्त्वभिः-यन्-इव विश्वानि वार्या पवमानः॥

पदार्थः—(एषः-शूरः) यह प्रगतिशील परमात्मा (सत्त्वभिः-यन्-इव) गुणबलों द्वारा प्राप्त होता हुआ-सा (विश्वानि वार्या) सब वरणीय सुखों को (पवमानः) साक्षात् होता हुआ उपासक को देना चाहता है—दे देता है॥ ३॥

१२५९. एष देवो रथर्यति पवमानो दिशस्यति। आविष्कृणोति वग्वनुम्॥ ४॥

पदपाठः— एषः देवः रथर्यति पवमानः दिशस्यति आविः आ विः कृणोति वग्वनुम्॥ ४॥

अन्वयः—एषः-पवमानः-देवः रथर्यति दिशस्यति वग्वनुम्-आविष्कृणोति॥

पदार्थः—(एषः-पवमानः-देवः) यह आनन्दधारा में आता हुआ द्योतमान सोम परमात्मा (रथर्यति) उपासक को रथ-रमणस्थान बनाना चाहता है (दिशस्यति) उसे अपना आनन्दरस देना चाहता है (वग्वनुम्-आविष्कृणोति) मधुरवाणी[१] आशीर्वाद-रूप को प्रकट करता है या उपासक की स्तुति वाणी को सफल करता है॥ ४॥

१२६०. एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते॥ ५॥

पदपाठः— एष देवः विपन्युभिः पवमानः ऋतायुभिः हरिः वाजाय मृज्यते॥ ५॥

अन्वयः—एषः-हरिः-पवमानः-देवः विपन्युभिः-ऋतायुभिः वाजाय मृज्यते॥

पदार्थः—(एषः-हरिः-पवमानः-देवः) यह दुःखापहर्ता सुखाहर्ता धारारूप में प्राप्त होता हुआ द्योतमान परमात्मा (विपन्युभिः-ऋतायुभिः) स्तुतिकर्ता मेधावी[२] सत्यकामी उपासकों के द्वारा (वाजाय मृज्यते) अमृत अन्न-भोग के लिये प्राप्त किया जाता है[३]॥ ५॥

---

१. ''वग्नुः-वाङ्नाम'' [निघं० १.११] मध्ये वकार उपजनश्छान्दसः।
२. ''विपन्युः-मेधावी'' [निघं० ३.१५]।
३. ''मार्ष्टि गतिकर्मा'' [निघं० २.१४]।

१२६१. एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ॥ ६ ॥

पदपाठः— एषः देवः विपा कृतः अति ह्वरांऽसि धावति पवमानोअदाभ्यः ॥ ६ ॥

अन्वयः—एषः-पवमानः-अदाभ्यः-देवः विपा कृतः ह्वरांसि-अतिधावति ॥

पदार्थः—(एषः-पवमानः-अदाभ्यः-देवः) यह आनन्दधारा में प्राप्त होनेवाला अबाध्य सोम-शान्तरूप परमात्मदेव (विपा कृतः) स्तुति वाणी द्वारा[1] साक्षात् किया हुआ या प्रसन्न किया हुआ (ह्वरांसि-अतिधावति) क्रोधों[2] या कुटिल भावों—सङ्कल्पों को[3] हटाकर प्राप्त होता है ॥ ६ ॥

१२६२. एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ॥ ७ ॥

पदपाठः— एषः दिवम् वि धावति तिरः रजांऽसि धारया पवमानःकनिक्रदत् ॥ ७ ॥

अन्वयः—एषः-पवमानः धारया कनिक्रदत् रजांसि तिरः दिवं विधावति ॥

पदार्थः—(एषः-पवमानः) यह पवित्रकर्ता सोम परमात्मा (धारया) स्तुतिवाणी से[4] (कनिक्रदत्) साधु शब्द करता हुआ (रजांसि तिरः) भोगलोकों को[5] तिरस्कृत कर—उन्हें छोड़कर उनसे अलग (दिवं विधावति) उपासक को मोक्षधाम में पहुँचाता है[6] ॥ ७ ॥

१२६३. एष दिवं व्यासरत्तिरो रजांस्यस्तृतः। पवमानः स्वध्वरः ॥ ८ ॥

पदपाठः— एषः दिवम् व्यासरत् वि आसरत् तिरः रजांऽसि अस्तृतः अ स्तृतः पवमानः स्वध्वरः सु अध्वरः ॥ ८ ॥

अन्वयः—एषः-पवमानः अस्तृतः रजांसि तिरः स्वध्वरः दिवं व्यासरत् ॥

पदार्थः—(एषः-पवमानः) यह पवित्रकर्ता सोम परमात्मा (अस्तृतः) अहिंसित अप्रतिबद्ध—बिना रुकावट वाला (रजांसि तिरः) भोगलोकों का तिरस्कार कर स्वयं भोगलोकों से परे हो (स्वध्वरः) उत्तम अध्यात्मयज्ञ आश्रय (दिवं

१. "विपा वाङ्नाम" [निघं० १.११]।
२. "ह्वरः क्रोधनाम" [निघं० २.१३]।
३. "ह्वृ कौटिल्ये" [भ्वादि०]।
४. "धारा वाङ्नाम" [निघं० १.१३]।
५. "लोका रजांस्युच्यन्ते" [निघं० ४.१९]।
६. "अन्तर्गतणिच्"।

व्यासरत्) मोक्षधाम में विशेष प्राप्त है ॥ ८ ॥

१२६४. एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति॥ ९ ॥

पदपाठः— एषप्रत्नेनजन्मना॥ ९ ॥

अन्वयः—एषः–हरिः–देवः प्रत्नेन जन्मना देवेभ्यः सुतः पवित्रे अर्षति ॥

पदार्थः—(एषः–हरिः–देवः) यह दुःखापहर्ता सुखाहर्ता सोम शान्त परमात्मदेव (प्रत्नेन जन्मना) देव जन्म—दिव्य जीवन होने से[1] (देवेभ्यः सुतः) जीवन्मुक्तों के लिये साक्षात् हुआ (पवित्रे अर्षति) पवित्र मोक्षधाम में प्राप्त होता है ॥ ९ ॥

१२६५. एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः॥ १० ॥

पदपाठः— एषः उ स्यः पुरुव्रतः पुरु व्रतः जज्ञानः जनयन् इषः धारया पवते सुतः॥ १० ॥

अन्वयः—एषः–स्यः–उ पुरुव्रतः जज्ञानः इषः–जनयन् धारया–सुतः–पवते ॥

पदार्थः—(एषः–स्यः–उ) यह वही (पुरुव्रतः) बहुत कर्म आनन्द कर्म शक्तिवाला (जज्ञानः) उपासक के अन्दर प्रत्यक्ष हुआ (इषः–जनयन्) इच्छाओं को या इष्ट कमनीय वस्तुओं को प्रसिद्ध करता हुआ (धारया–सुतः–पवते) स्तुति धाराप्रवाह से साक्षात् कर्ताओं[2] को प्राप्त होता है ॥ १० ॥

द्वितीय खण्ड

अष्टर्चं

ऋषिः—असितो देवलो वा (रागबन्धन से रहित या परमात्मा को अपने अन्दर लाने वाला उपासक)॥ देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री॥

१२६६. एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम्॥ १ ॥

पदपाठः— एषः धिया याति अण्व्या शूरः रथेभिः आशुभिः गच्छन्निन्द्रस्यनिष्कृतम्॥ १ ॥

अन्वयः—एषः–शूरः अण्व्या धिया आशुभिः–रथेभिः इन्द्रस्य निष्कृतं गच्छन्

---

१. "देवा वै प्रत्नम्" [मै० १.५.५]।

२. 'सुतः' क्विप् प्रत्ययः भूते।

याति ॥

पदार्थः—(एषः-शूरः) यह पराक्रमी सोम—परमात्मा (अण्व्या धिया) सूक्ष्म स्तुति से—आत्मीय स्तुति से[1] (आशुभिः-रथेभिः) शीघ्रगामी या व्यापनेवाले रमणीय तथा रममाण गुणों से (इन्द्रस्य निष्कृतं गच्छन् याति) उपासक आत्मा के संस्कृत अन्तःकरण को 'अवगच्छन्' जानता हुआ प्राप्त होता है ॥ १ ॥

१२६७. एष पुरू धियायते बृहते देवतातये। यत्रामृतास आशत ॥ २ ॥

पदपाठः— एषः पुरु धियायते बृहते देवतातये यत्र अमृतासः अ मृतासः आशत ॥ २ ॥

अन्वयः—एषः बृहते देवतातये पुरु धियायते यत्र-अमृतासः-आशत ॥

पदार्थः—(एषः) यह शान्तस्वरूप परमात्मा (बृहते देवतातये) महती मुक्ति देने के लिये (पुरु धियायते) बहु स्तुति चाहता है (यत्र-अमृतासः-आशत) जहाँ मुक्त आत्माएँ आनन्दभोग को प्राप्त हैं ॥ २ ॥

१२६८. एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः प्रचक्राणं महीरिषः ॥ ३ ॥

पदपाठः— एतम् मृजन्ति मर्ज्यम् उप द्रोणेषु आयवः प्रचक्राणम् प्र चक्राणम् महीः इषः ॥ ३ ॥

अन्वयः—महीः-इषः-चक्राणम् एतं मर्ज्यम् आयवः द्रोणेषु उपमृजन्ति ॥

पदार्थः—(महीः-इषः-चक्राणम्) महती कामनाओं को पूरा करने वाले (एतं मर्ज्यम्) इस प्राप्त करने योग्य को (आयवः) उपासकजन[2] (द्रोणेषु) मन, बुद्धि, चित्त, अहङ्कार पात्रों में (उपमृजन्ति) उपगत होते हैं—मनन आदि करके अपनाते हैं ॥ ३ ॥

१२६९. एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा। यदी तुञ्जन्ति भूर्णयः ॥ ४ ॥

पदपाठः— एषः हितः वि नीयते अन्तरिति शुन्ध्यावता पथा यदि तुञ्जन्ति भूर्णयः ॥ ४ ॥

---

१. ''वाग्वैधीः'' [का० श० ४.२.४.३]।

२. ''आयवः-मनुष्याः'' [निघं० २.३]।

अन्वयः—(यदि) यद्-इ एषः-हितः शुन्ध्यावता पथा अन्तः-विनीयते भूर्णयः-तुञ्जन्ति ॥

पदार्थः—(यद्-इ) जब ही (एषः-हितः) यह हितकर सोम-शान्त परमात्मा (शुन्ध्यावता पथा) शुद्धि—आत्मपरिशुद्धि वाले यम, नियम आदि मार्ग—योगमार्ग से (अन्तः-विनीयते) अन्दर बिठा लिया जाता है—बैठ जाता है तो (भूर्णयः-तुञ्जन्ति) धारण करने वाले उपासकजन इसे ग्रहण कर लेते हैं—अपना लेते हैं[1] ॥४॥

१२७०. एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिन्धूनां भवन्॥५॥

पदपाठः— एषः रुक्मिभिः ईयते वाजी शुभ्रेभिः अंशुभिः पतिः सिन्धूनाम् भवन्॥५॥

अन्वयः—एषः-वाजी सिन्धूनां पतिः-भवन् रुक्मिभिः शुभ्रेभिः-अंशुभिः ईयते ॥

पदार्थः—(एषः-वाजी) यह अमृत अन्नभोग वाला सोम परमात्मा (सिन्धूनां पतिः-भवन्) स्यन्दमान—शरीर में बहने वाले प्राणों[2] का पालक होता हुआ (रुक्मिभिः शुभ्रेभिः-अंशुभिः) तेजस्वी शुभ्र—शोभन आनन्द प्रवाहों से (ईयते) उपासक के अन्दर प्राप्त होता है ॥५॥

१२७१. एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा॥६॥

पदपाठः— एषः शृङ्गाणि दोधुवत् शिशीते यूथ्यः वृषा नृम्णा दधानः ओजसा॥६॥

अन्वयः—एषः ओजसा शृङ्गाणि दोधुवत् यूथ्यः-वृषा शिशीते नृम्णा दधानः ॥

पदार्थः—(एषः) यह परमात्मा (ओजसा) ज्ञानबल से (शृङ्गाणि दोधुवत्) अपनी आनन्द तरङ्गों को उपासक के अन्दर तरङ्गित कर देता है (यूथ्यः-वृषा शिशीते) जैसे गोसमूह का साण्ड अपने सींगों को तीक्ष्ण करता है उन्हें भूमि में धुनकर[3] (नृम्णा दधानः) उपासकों के लिये अध्यात्म अन्न[4] अमृतभोग को धारण करने के हेतु ॥६॥

---

१. "तुजि हिंसाबलादाननिकेतनेषु" [चुरादि०] आदानार्थेऽत्र।
२. "प्राणो वै सिन्धुः" [श० ८.५.३.७]।
३. लुप्तोपमावाचकालङ्कारः।
४. "अन्नं नृम्णाम्" [कौ० २७.४]।

१२७२. एष वसूनि पिब्दनः परुषा ययिवाँ अति। अव शादेषु गच्छति॥ ७॥

पदपाठः— एषः वसूनि पिब्दनः परुषा ययिवान् अति अव शादेषु गच्छति॥ ७॥

अन्वयः—एषः परुषा वसूनि पिब्दनः अतिययिवान् शादेषु-अवगच्छति॥

पदार्थः—(एषः) यह सोम—परमात्मा (परुषा वसूनि) कठोर आच्छादक अध्यात्म सद्भावों के आवरक काम आदि दुर्वृत्तों को (पिब्दनः) नाशक[1] (अतिययिवान्) दूर कर जाता है—भगा देता है (शादेषु-अवगच्छति) वह उपासक के अन्दर रहने वाले—शादों—शातनीयों—नाशनीयों—छिपे हुओं को जानता है॥ ७॥

१२७३. एतमु त्यं दश क्षिपो हरिं हिन्वन्ति यातवे। स्वायुधं मदिन्तमम्॥ ८॥

पदपाठः— एतमुत्यन्दशक्षिपः हरिम् हिन्वन्ति यातवे स्वायुधम् सु आयुधम् मदिन्तमम्॥ ८॥

अन्वयः—एतं त्यम्-उ स्वायुधं मदिन्तमं हरिम् दश क्षिपः-हिन्वन्ति॥

पदार्थः—(एतं त्यम्-उ) इस उस ही (स्वायुधं मदिन्तमं हरिम्) उत्तम आयु धारण करानेवाले अति हर्षकारक दुःखापहर्ता सुखाहर्ता सोम परमात्मा को (दश क्षिपः-हिन्वन्ति) आत्मा को अपने विषय में प्रेरित कर्ता मन, बुद्धि, चित्त, अहङ्कार और पाँच ज्ञानेन्द्रियाँ तथा वाणी सदुपयुक्त हो परमात्मा को प्राप्त कराती हैं॥ ८॥

तृतीय खण्ड

षड्टच

ऋषिः—रहूगणः (विषयों से रहित परमात्मप्राप्ति के लिये गणा वाणी—स्तुतिवाणी[2] जिसकी है ऐसा उपासक)॥ देवता—पवमानः सोमः (आनन्दधारा में आता हुआ परमात्मा)॥ छन्दः—गायत्री॥

१२७४. एष उ स्य वृषा रथोऽव्या वारेभिरव्यत। गच्छन्वाजं सहस्त्रिणम्॥ १॥

पदपाठः— एषः उ स्यः वृषा रथः अव्यावारेभिरव्यत गच्छन् वाजम् सहस्त्रिणम्॥ १॥

---

१. ''पिब्द नाशे'' वैदिक धातुः।

२. ''गणा वाङ्नाम'' [निघं० १.११]।

अन्वयः—एषः-स्यः-उ वृषा रथः अव्याः-वारेभिः-अज्यते सहस्त्रिणं वाजं गच्छन् ॥

पदार्थः—(एषः-स्यः-उ) यह वही (वृषा रथः) कामनावर्षक रमणीय रसरूप स्तोम—परमात्मा (अव्याः-वारेभिः-अज्यते) पृथिवी[1]—पार्थिव देह के साधन द्वारों[2] श्रोत्र, मन, बुद्धि, चित्त, अहङ्कारों से श्रवण, मनन आदि करने से व्यक्त—साक्षात् किया जाता है (सहस्त्रिणं वाजं गच्छन्) सहस्त्रों के ऊपर—सर्वोच्च अमृत अन्नभोग को[3] प्राप्त कराने के हेतु[4] ॥ १ ॥

१२७५. एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥ २ ॥

पदपाठः— एतम् त्रितस्य योषणः हरिꣳ हिन्वन्त्यद्रिभिः इन्दुमिन्द्रायपीतये ॥ २ ॥

अन्वयः—एतं हरिम्-इन्दुम् त्रितस्य योषणः-अद्रिभिः हिन्वन्ति इन्द्राय पीतये ॥

पदार्थः—(एतं हरिम्-इन्दुम्) इस दुःखापहर्ता सुखाहर्ता आनन्दरसपूर्ण परमात्मा को (त्रितस्य) स्थूल, सूक्ष्म, कारण शरीरगत—इन्द्र—आत्मा की (योषणः-अद्रिभिः) प्रीति साधने वाले मन, बुद्धि, चित्त, अहङ्कार, वाक्, इन्द्रियाँ श्लोक प्रशंसा स्तुति करने वाले[5] (हिन्वन्ति) आत्मा की ओर प्रेरित करते हैं (इन्द्राय पीतये) आत्मा के पान करने के लिये ॥ २ ॥

१२७६. एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छं जारो न योषितम् ॥ ३ ॥

पदपाठः— एषः स्यः मानुषीषु आ श्येनः न विक्षु सीदति गच्छन् जारः न योषितम् ॥ ३ ॥

अन्वयः—एषः-स्यः श्येनः-न मानुषीषु विक्षु-आसीदति जारः-न-योषितम् गच्छन् ॥

पदार्थः—(एषः-स्यः) यह वह सोम—परमात्मा (श्येनः-न) प्रशंसनीय गति वाले भास—वाज पक्षी के समान (मानुषीषु विक्षु-आसीदति) मननशील

---

१. "इयं पृथिवी वा अविः" [श० ६.१.२.३३]।
२. "द्वारो वारयते" [निरु० ८.१०]।
३. "अमृतोऽन्नं वै वाजः" [जै० १.१९३]।
४. 'गच्छन्-गमयन्' अन्तर्गतणिजर्थः।
५. "अद्रिरसि श्लोककृत्" [काठ० १.५] विभक्तिव्यत्ययेन प्रथमार्थे तृतीया।

प्रजाओं में समन्तरूप से आ जाता है (जारः-न-योषितम् गच्छन्) अर्चनीय स्वामी[1] जैसे सेवक को[2] सेवार्थ प्राप्त होता है ॥ ३ ॥

१२७७. एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।
य इन्दुर्वारमाविशत् ॥ ४ ॥

पदपाठः— एषः स्यः मद्यः रसः अव चष्टे दिवः शिशुः यः इन्दुः वारम् आविशत् आ अविशत् ॥ ४ ॥

अन्वयः—एषः-स्यः मद्यः-रसः यः-इन्दुः दिवः शिशुः वारम्-आविशत् ॥

पदार्थः—(एषः-स्यः) यह वह (मद्यः-रसः) हर्षकर रसरूप रसीला (यः-इन्दुः) जो दीप्तिमान् परमात्मा (दिवः शिशुः) मोक्षधाम का शंसन करने वाला उपदेष्टा या प्रदाता[3] (वारम्-आविशत्) वरणीय हृदय को या आत्मा को[4] आविष्ट हो जाता है ॥ ४ ॥

१२७८. एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।
क्रन्दन्योनिमभि प्रियम् ॥ ५ ॥

पदपाठः— एषः स्यः पीतये सुतः हरिः अर्षति धर्णसिः क्रन्दन् योनिम् अभि प्रियम् ॥ ५ ॥

अन्वयः—एषः-स्यः-धर्णसिः-हरिः-सुतः प्रियं क्रन्दन् योनिम्-अभि-अर्षति ॥

पदार्थः—(एषः-स्यः-धर्णसिः-हरिः-सुतः) यह वह धारणकर्ता दुःखापहरणकर्ता सुखाहरणकर्ता परमात्मा उपासना द्वारा उपासित साधित हुआ (प्रियं क्रन्दन्) हितकर वचन बोलता हुआ (योनिम्-अभि-अर्षति) हृदय के प्रति—हृदय में प्राप्त होता है ॥ ५ ॥

१२७९. एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भते ॥ ६ ॥

पदपाठः— एतम् त्यम् हरितः दश मर्मृज्यन्ते अपस्युवः याभिः मदाय शुम्भते ॥ ६ ॥

---

१. ''जरति-अर्चतिकर्मा'' [निघं० ३.१४] ।

२. ''जुषते सेवते-इति योषित्'' [उणादि० १.९७] युष इति सौत्रो धातुः । अथवा जुष इत्यस्य वर्णविकारेण पाठः (हसृरुहियुषिभ्य इतिः) इत्युणादिसूत्रभाष्ये महर्षिदयानन्दसरस्वती ।

३. ''शिशुः शंसनीयोभवति शिशीतेर्वा स्याद् दानकर्मणः'' [निघं० १०.३९] ।

४. ''आत्मा यस्य शरीरम्'' [श० १४.६.७.३०] ।

अन्वयः—एतं त्यम् अपस्युवः दश हरितः मर्मृज्यन्ते याभिः-मदाय शुम्भते ॥

पदार्थः—(एतं त्यम्) इस उस सोम—शान्तस्वरूप परमात्मा को (अपस्युवः) कर्म में व्याप्त होने वाले (दश हरितः) दश हरणशील—मन, बुद्धि, चित्त, अहङ्कार, श्रोत्रादि पञ्च ज्ञानेन्द्रियाँ और वाक्—वाणी का अपने मनन, विवेचन, स्मरण-चिन्तन, ममत्व, श्रवण-स्तवन आदि कर्मप्रवृत्तियाँ (मर्मृज्यन्ते) पुनः पुनः प्राप्त करती हैं[1] (याभिः-मदाय शुम्भते) जिनके द्वारा हर्ष आनन्द कर[2] सोम—शान्तस्वरूप परमात्मा शोभित—आत्मा में प्रकाशित होता है ॥ ६ ॥

चतुर्थ खण्ड

षड्टच

ऋषिः—प्रियमेधः (प्रिय है मेधा जिसको) ॥ देवता—सोमः (शान्तस्वरूप परमात्मा) ॥ छन्दः—गायत्री ॥

१२८०. एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यं वारं वि धावति ॥ १ ॥

पदपाठः— एषः वाजी हितः नृभिः विश्ववित् विश्व वित् मनसः पतिः अव्यंवारंविधावति ॥ १ ॥

अन्वयः—एषः-वाजी विश्ववित् मनसः-पतिः नृभिः-हितः अव्यं वारं विधावति ॥

पदार्थः—(एषः-वाजी) यह अमृत अन्नभोग देने वाला (विश्ववित्) विश्वज्ञाता (मनसः-पतिः) मन का स्वामी (नृभिः-हितः) मुमुक्षुजनों[3] से धारित—धारण किया हुआ (अव्यं वारं विधावति) पार्थिव देह विगत करके वरणीय मन—मुमुक्षु उपासक के मन को प्राप्त होता है ॥ १ ॥

१२८१. एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् ॥ २ ॥

पदपाठः— एषः पवित्रे अक्षरत् सोमः देवेभ्यः सुतः विश्वा धामानि आविशन् आ विशन् ॥ २ ॥

अन्वयः—एषः-सोमः देवेभ्यः सुतः विश्वा धामानि-आविशन् पवित्रे-अक्षरत् ॥

---

१. "मार्ष्टि गतिकर्मा" [निघं० २.१४]।

२. प्रथमार्थे चतुर्थी।

३. "नरो ह वै देवविशः" [जै० २.८९]।

पदार्थः—(एषः–सोमः) यह सोम—शान्तस्वरूप परमात्मा (देवेभ्यः सुतः) मुमुक्षु उपासकों द्वारा[1] साक्षात् किया हुआ (विश्वा धामानि–आविशन्) सारे मन, बुद्धि, श्रोत्र, नेत्र आदि अङ्गों में[2] आविष्ट होने के हेतु (पवित्रे–अक्षरत्) पवित्र स्थान हृदय में होता है ॥ २ ॥

१२८२. एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ॥ ३ ॥

पदपाठः— एषः देवः शुभायते अधि योनौ अमर्त्त्यः अ मर्त्त्यः वृत्रहा वृत्र हा देववीतमः देव वीतमः ॥ ३ ॥

अन्वयः—एषः वृत्रहा देववीतमः अमर्त्यः देवः योनौ–अधि शुम्भते ॥

पदार्थः—(एषः) यह (वृत्रहा) पापनाशक[3] (देववीतमः) मुमुक्षुजनों का अत्यन्त कमनीय[4] (अमर्त्यः) अमर (देवः) द्योतमान सोम परमात्मा (योनौ–अधि शुम्भते) हृदयस्थान में प्रकाशित होता है—चमकता है[5] ॥ ३ ॥

१२८३. एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ॥ ४ ॥

पदपाठः— एषः वृषा कनिक्रदत् दशभिः जामिभिः यतः अभि द्रोणानि धावति ॥ ४ ॥

अन्वयः—एषः–वृषा दशभिः–जामिभिः–यतः कनिक्रदत् द्रोणानि–अभि धावति ॥

पदार्थः—(एषः–वृषा) यह कामनावर्षक सोम—परमात्मा (दशभिः–जामिभिः–यतः) दश गति करने वाली बढ़ी–चढ़ी[6] स्तुतियों—मन के मनन, बुद्धि के विवेचन, चित्त के स्मरण, अहङ्कार के ममत्व तथा पाँच ज्ञानेन्द्रियों के श्रवण आदि और वाक् इन्द्रिय के प्रकथन रूप स्तुतियों द्वारा वशीकृत—वश किया हुआ (कनिक्रदत्) साधु उपदेश करता हुआ (द्रोणानि–अभि धावति) अधिकारी उपासक पात्रों की ओर गति करता है—उनको प्राप्त होता है ॥ ४ ॥

---

१. विभक्ति व्यत्ययः, तृतीयास्थाने चतुर्थी।
२. "अङ्गानि वै धामानि" [का० श० ४.३.४.११]।
३. "पाप्मा वै वृत्रः" [श० ११.१.५.७]।
४. "वी गतिव्याप्तिप्रजनकान्ति...." [अदादि०]।
५. "शुम्भ दीप्तौ" [भ्वादि०]।
६. "जमति गतिकर्मा" [निघं० २.१४]। "जाम्यतिरेकनाम" [निरु० ४.२०] अतिरेकः प्रवृद्धः। "उप त्वा जामयो गिरः" [साम० पू० १.१.३]।

१२८४. एष सूर्यमरोचयत् पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ॥ ५ ॥

पदपाठः— एषः सूर्यम् अरोचयत् पवमानः अधि द्यवि पवित्रे मत्सरः मदः ॥ ५ ॥

अन्वयः—एषः-पवमानः द्यवि-अधि सूर्यम्-अरोचयत् मत्सरः-मदः पवित्रे॥

पदार्थः—(एषः-पवमानः) यह आनन्दधारा में प्राप्त होने वाला परमात्मा (द्यवि-अधि सूर्यम्-अरोचयत्) जैसे द्युलोक में सूर्य को चमकाता है[1] ऐसे (मत्सरः-मदः पवित्रे) तृप्ति करने वाला[2] हर्षयिता विकसित करने वाला पवित्र हृदय में उपासक आत्मा को चमकाता है ॥ ५ ॥

१२८५. एष सूर्येण हासते संवसानो विवस्वता। पतिर्वाचो अदाभ्यः ॥ ६ ॥

पदपाठः— एषः सूर्येण हासते संवसानः सम् वसानः विवस्वता वि वस्वता पतिः वाचः अदाभ्यः अ दाभ्यः ॥ ६ ॥

अन्वयः—एषः वाचः-पतिः अदाभ्यः संवसानः विवस्वता सूर्येण हासते 'हासयते'॥

पदार्थः—(एषः) यह (वाचः-पतिः) स्तुति वाणी तथा वेदवाणी का स्वामी[3] (अदाभ्यः) न दबाने योग्य परमात्मा (संवसानः) अपने आनन्दमय रसीले स्वरूप से उपासकों को सम्यक् आच्छादित करता हुआ[4] (विवस्वता सूर्येण) खुलते हुए—किरणें फेंकते हुए सूर्य के समान[5] (हासते 'हासयते') हँसता—हर्षित करता हुआ—ज्ञानप्रकाश और अमृत आनन्दरस से हर्षाता है ॥ ६ ॥

पञ्चम खण्ड

षड्टच

ऋषिः—नृमेधः (मुमुक्षु बुद्धिवाला[6] उपासक)॥ देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री॥

१२८६. एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप द्विषः ॥ १ ॥

---

१. अत्र लुप्तोपमावाचकोपमालङ्कारः।
२. "मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः" [निघं० २.५]।
३. "प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्" [यजु० ३४.५७]।
४. "वस्न आच्छादने" [अदादि०]। ५. "लुप्तोपमावाचकालङ्कारः"।
६. "नरो ह वै देवविशः" [जै० १.९३]।

पदपाठः— **एषः कविः अभिष्टुतः अभि स्तुतः पवित्रे अधि तोशते पुनानः घ्नन् अप द्विषः ॥ १ ॥**

अन्वयः—एषः–कविः अभिष्टुतः पुनानः द्विषः–अपघ्नन् पवित्रे–अधितोशते ॥

पदार्थः—(एषः–कविः) यह क्रान्तदर्शी सर्वज्ञ (अभिष्टुतः) स्तुति में लाया हुआ (पुनानः) पवित्र करता हुआ (द्विषः–अपघ्नन्) द्वेष भावनाओं को दूर हटाता हुआ (पवित्रे–अधितोशते) हृदय में प्राप्त होता है ॥ १ ॥

१२८७. एष इन्द्राय वायवे स्वर्जित् परि षिच्यते। पवित्रे दक्षसाधनः ॥ २ ॥

पदपाठः— **एषः इन्द्राय वायवे स्वर्जित् स्वः जित् परि सिच्यते पवित्रे दक्षसाधनः दक्ष साधनः ॥ २ ॥**

अन्वयः—एषः–स्वर्जित्–दक्षसाधनः वायवे–इन्द्राय पवित्रे परिषिच्यते ॥

पदार्थः—(एषः–स्वर्जित्–दक्षसाधनः) यह मोक्षादि पर अधिकार रखने वाला आत्मबलसाधक (वायवे–इन्द्राय) आयु वाले[1] उपासक आत्मा के लिये (पवित्रे परिषिच्यते) पवित्र हृदय में परिपूर्णरूप से प्राप्त होता है ॥ २ ॥

१२८८. एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित् ॥ ३ ॥

पदपाठः— **एषः नृभिः वि नीयते दिवः मूर्द्धा वृषा सुतः सोमः वनेषु विश्ववित् विश्व वित् ॥ ३ ॥**

अन्वयः—एषः दिवः–मूर्धा वृषा विश्ववित् सोमः नृभिः सुतः वनेषु विनीयते ॥

पदार्थः—(एषः) यह (दिवः–मूर्धा) मोक्षधाम का मूर्धारूप—मोक्षधाम में मूर्धा के समान वर्तमान (वृषा) सुखवर्षक (विश्ववित्) विश्व में प्राप्त—सर्वत्र व्यापक (सोमः) शान्तस्वरूप परमात्मा (नृभिः सुतः) मुमुक्षुजनों से[2] साधित उपासित हुआ (वनेषु विनीयते) सम्भजन करणों—मन, बुद्धि, चित्त, अहङ्कार में आ जाता है ॥ ३ ॥

१२८९. एष गव्युरचिक्रदत् पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः ॥ ४ ॥

पदपाठः— **एषः गव्युः अचिक्रदत् पवमानः हिरण्ययुः इन्दुः सत्राजित् सत्रा जित् अस्तृतः अ स्तृतः ॥ ४ ॥**

---

१. "आयुर्वा एष यद् वायुः" [ऐ० आ० २.४.३] मतुब्लोपश्छान्दसः।

२. "नरो ह वै देवविशः" [जै० १.८९]।

अन्वयः—एषः पवमानः इन्दुः अस्तृतः सत्राजित् गव्युः हिरण्ययुः अचिक्रदत् ॥

पदार्थः—(एषः पवमानः) यह आनन्दधारा में प्राप्त होने वाला (इन्दुः) रसीला परमात्मा (अस्तृतः) अहिंसित (सत्राजित्) सबको समन्तरूप से जीतने—स्वाधिकार में रखनेवाला[१] (गव्युः) हमारे लिये वाणी का इच्छुक (हिरण्ययुः) अमृत का इच्छुक[२] (अचिक्रदत्) साधु वचन बोलता हुआ प्राप्त होता है ॥ ४ ॥

१२९०. एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ॥ ५ ॥

पदपाठः— एषः शुष्मी असिष्यदत् अन्तरिक्षेः वृषा हरिः पुनानः इन्दुः इन्द्रम् आ ॥ ५ ॥

अन्वयः—एषः शुष्मी वृषा हरिः पुनानः इन्दुः इन्द्रम्-आ अन्तरिक्षे असिष्यदत् ॥

पदार्थः—(एषः) यह (शुष्मी) बलवान्[३] (वृषा) कामनावर्षक (हरिः) दोष-हर्ता (पुनानः) शोधता हुआ (इन्दुः) रसीला परमात्मा (इन्द्रम्-आ) उपासक आत्मा को प्राप्त होकर (अन्तरिक्षे) हृदयावकाश में (असिष्यदत्) सञ्चार करता है ॥ ५ ॥

१२९१. एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ॥ ६ ॥

पदपाठः— एषः शुष्मी अदाभ्यः अ दाभ्यः सोमःपुनानोअर्षति देवावीरघशंसहा ॥ ६ ॥

अन्वयः—एषः शुष्मी अदाभ्यः पुनानः देवावीः अघशंसहा सोमः अर्षति ॥

पदार्थः—(एषः) यह (शुष्मी) बलवान् (अदाभ्यः) न दबने वाला (पुनानः) पवित्र करने वाला (देवावीः) मुमुक्षु उपासकों का रक्षक (अघशंसहा) पापप्रशंसक विचारों का नाशक (सोमः) शान्तस्वरूप परमात्मा (अर्षति) प्राप्त होता है ॥ ६ ॥

षष्ठ खण्ड

षडृच

ऋषिः—रहुगणः (वासनारहित स्तुतिवाणी वाला[४])॥ देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री ॥

१२९२. स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन् रक्षांसि देवयुः ॥ १ ॥

---

१. ''सर्वं वै सत्रम्'' [श० ४.६.१.६५]।
२. ''अमृतं वै हिरण्यम्'' [तै० सं० ५.२.७.९] छन्दसि परेच्छामृतं स्थचल।
३. ''शुष्मं बलनाम'' [निघं० २.९]।
४. ''गणा वाङ्नाम'' [निघं० १.११]।

पदपाठः— **सः सुतः पीतये वृषा सोमः पवित्रे अर्षति विघ्नन् वि घ्नन् रक्षांᳬसि देवयुः ॥ १ ॥**

अन्वयः—सः वृषा रक्षांसि विघ्नन् देवयुः सुतः पीतये पवित्रे-अर्षति ॥

पदार्थः—(सः) वह (वृषा) कामवर्षक (रक्षांसि विघ्नन्) जिनसे रक्षा करनी चाहिए ऐसे विघ्न बाधाओं को[1] विनष्ट करता (देवयुः) मुमुक्षु उपासक को चाहने वाला (सुतः) उपासित हुआ—उपासना में आया हुआ (पीतये) स्वानन्दरसपान कराने के लिये (पवित्रे-अर्षति) पवित्र हृदय में प्राप्त होता है ॥ १ ॥

१२९३. **स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत् ॥ २ ॥**

पदपाठः— **सः पवित्रे विचक्षणः वि चक्षणः हरिरर्षतिधर्णसिः अभियोनिङ्कनिक्रदत् ॥ २ ॥**

अन्वयः—सः विचक्षणः धर्णसिः हरिः योनिम्-अभि पवित्रे कनिक्रदत्-अर्षति ॥

पदार्थः—(सः) वह (विचक्षणः) द्रष्टा (धर्णसिः) धारणकर्ता (हरिः) दोषहरणकर्ता सोम—परमात्मा (योनिम्-अभि) स्वस्थान उपासक आत्मा को अभिप्राप्त होना लक्ष्य कर (पवित्रे कनिक्रदत्-अर्षति) हृदय में साधु प्रवचन करता हुआ प्राप्त होता है ॥ २ ॥

१२९४. **स वाजी रोचनं दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम् ॥ ३ ॥**

पदपाठः— **सः वाजी रोचनम् दिवः पवमानः वि धावति रक्षोहा रक्षः हा वारम् अव्ययम् ॥ ३ ॥**

अन्वयः—सः-वाजी दिवः-रोचनम् रक्षोहा वारम्-अव्ययम् विधावति ॥

पदार्थः—(सः-वाजी) वह अमृत अन्नभोग वाला (दिवः-रोचनम्) मोक्षधाम का प्रकाशक (रक्षोहा) विघ्न दोष विनाशक (वारम्-अव्ययम् विधावति) वरने—चाहने वाले अविनाशी आत्मा को विशेषरूप से प्राप्त होता है ॥ ३ ॥

१२९५. **स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह ॥ ४ ॥**

---

१. ''रक्षस-रक्षितव्यमस्मात्'' [निरु० ५.१८]।

पदपाठः— सः त्रितस्य अधि सानवि पवमानः अरोचयत् जामिभिः सूर्यम् सह ॥ ४ ॥

अन्वयः—सः-पवमानः जामिभिः सह त्रितस्य सानवि-अधि सूर्यम् अरोचयत् ॥

पदार्थः—(सः-पवमानः) वह सोम—परमात्मा (जामिभिः सह) बढ़ती हुई स्तुतियों के द्वारा (त्रितस्य) स्थूल सूक्ष्म कारण शरीरधारी आत्मा के (सानवि-अधि) सम्भजनीय सर्वोच्च साधन अन्तःकरण में उस उपासक आत्मा को (सूर्यम्) 'सूर्यमिव' सूर्य की भाँति[1] (अरोचयत्) तेजस्वी बना देता है ॥ ४ ॥

१२९६. स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत् ॥ ५ ॥

पदपाठः— सः वृत्रहा वृत्र हा वृषा सुतः वरिवोवित् वरिवः वित् अदाभ्यः अ दाभ्यः सोमः वाजम् इव असरत् ॥ ५ ॥

अन्वयः—सः वृत्रहा वृषा वरिवोवित् अदाभ्यः सोमः सुतः वाजम्-इव-असरत् ॥

पदार्थः—(सः) वह (वृत्रहा) पापनाशक (वृषा) कामनावर्षक (वरिवोवित्) मोक्षैश्वर्य को प्राप्त कराने वाला (अदाभ्यः) अहिंसनीय (सोमः) शान्त परमात्मा (सुतः) उपासक द्वारा साक्षात् हुआ (वाजम्-इव-असरत्) उसे ऐसे प्राप्त होता है जैसे यज्ञ को[2] ब्रह्मा प्राप्त होता है ॥ ५ ॥

१२९७. स देवः कविनेषितो३ऽभि द्रोणानि धावति। इन्दुरिन्द्राय मंहयन् ॥ ६ ॥

पदपाठः— सः देवः कविना इषितः अभिद्रोणानिधावति इन्दुः इन्द्राय मंꣳहयन् ॥ ६ ॥

अन्वयः—सः देवः इन्दुः कविना-इषितः इन्द्राय मंहयन् द्रोणानि-अभिधावति ॥

पदार्थः—(सः) वह (देवः) द्योतमान (इन्दुः) आनन्दरसपूर्ण सोम—परमात्मा (कविना-इषितः) स्तुतिकर्मा मेधावी से प्रेरित—स्तुति में लाया हुआ (इन्द्राय मंहयन्) आत्मा के लिये स्वानन्द देने[3] के हेतु (द्रोणानि-अभिधावति) मन, बुद्धि,

---

१. "सूर्यः सूर्यमिव" लुप्तोपमावाचकालङ्कारः।

२. "वाजं त्वा सरिष्यन्तं त्वा वाजजितं सम्मामीति यज्ञं त्वा वक्ष्यन्तं यज्ञियं सम्मार्जीत्यवैतदाह" [श० १.४.४.१५]।

३. "मंहतेर्दानकर्मा" [निघं० ३.२०]।

चित्त, अहङ्कार पात्रों में प्राप्त होता है ॥ ६ ॥

सप्तम खण्ड

षड्टच

ऋषिः—पवित्रो वसिष्ठो वोभौ वा (शुद्धान्तःकरण वाला या परमात्मा में अन्तन्त बसने वाला उपासक या दोनों)॥ देवता—पावमान्या अध्ययनप्रशंसा (पावमानी ऋचाओं के अध्ययन की प्रशंसा)॥ छन्दः—अनुष्टुप्॥

१२९८. **यः पावमानी रध्येत्यृषिभिः संभृतं रसम्। सर्वं स पूतमश्नाति स्वदितं मातरिश्वना॥ १ ॥**

पदपाठः— **यः पावमानीः अध्येति अधि एति ऋषिभिः सम्भृतम् सम् भृतम् रसम् सर्वम् सः पूतम् अश्नाति स्वदितम् मातरिश्वना॥ १ ॥**

अन्वयः—यः पावमानीः-अध्येति ऋषिभिः सम्भृतं रसम् सः सर्वं पूतम् मातरिश्वना स्वदितम् अश्नाति ॥

पदार्थः—(यः) जो उपासक (पावमानीः-अध्येति) पवमान—आनन्दधारारूप में प्राप्त होने वाले परमात्मा की स्तुतियों को अपने अन्दर अधिगत करता है—आत्मा में समा लेता है (ऋषिभिः सम्भृतं रसम्) जिन स्तुतियों के कवियों—स्तुतिकर्ताजनों ने[1] रस—आनन्दरस—पवमान परमात्मरस को अपने अन्दर परम्परा से सम्यक् भरा—धारा[2] भरता—धारता है (सः) वह पावमानी स्तुतियों को अपने अन्दर बिठाने वाला (सर्वं पूतम्) समग्र प्राप्त रस को (मातरिश्वना स्वदितम्) माता—अन्तरिक्ष—हृदयाकाश में प्राप्त मन से स्वदित—मनन आदि से अनुभव किए हुए को (अश्नाति) भोगता है ॥ १ ॥

१२९९. **पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्। तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम्॥ २ ॥**

पदपाठः— **पावमानीः यः अध्येति अधि एति ऋषिभिःसम्भृतथ्ठरसम् तस्मै सरस्वती दुहे क्षीरम् सर्पिः मधु उदकम्॥ २ ॥**

[पूर्वार्द्ध का अर्थ पूर्व समान जानें]

अन्वयः—तस्मै सरस्वती क्षीरं सर्पिः-मधूदकं दुहे ॥

पदार्थः—(तस्मै सरस्वती) उस उपासक के लिये स्तुति वाणी[3] (क्षीरं सर्पिः-

---

१. "कवय ऋषयः" [मै० ४.१.२]। २. "लिङ्ग व्यत्ययश्छान्दसः।"

३. "सरस्वती वाङ्नाम" [निरु० १.११]।

मधूदकं दुहे) दूध, घृत, मधुर जल को दूहती है॥ २॥

१३००. पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः। ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम्॥ ३॥

पदपाठः— पावमानी स्वस्त्ययनीः स्वस्ति अयनिः सुदुघाः सु दुघाः हि घृतश्चुतः घृत श्चुतः ऋषिभिः सम्भृतः सम् भृतः रसः ब्राह्मणेषु अमृतम् अ मृतम् हितम्॥ ३॥

अन्वयः—पावमानीः स्वस्ति-अयनीः सुदुघाः हि घृतश्चुतः ऋषिभिः-रसः सम्भृतः ब्राह्मणेषु-अमृतं हितम्॥

पदार्थः—(पावमानीः) पवमान—सोम—परमात्मा की स्तुतियाँ (स्वस्ति-अयनीः) कल्याण प्राप्त कराने वाली (सुदुघाः) साधुरूप कामना को दूहने वाली (हि) अवश्य (घृतश्चुतः) ज्ञानदीप्ति को झिराने वाली हैं (ऋषिभिः-रसः सम्भृतः) जिनको अपने अन्दर धारण कर उपासक मेधावीजनों ने रसरूप परमात्मा को परम्परा से सम्यक् धारण किया है (ब्राह्मणेषु-अमृतं हितम्) ब्रह्मवेत्ता विद्वानों के निमित्त अमृत—मोक्ष कहा गया है॥ ३॥

१३०१. पावमानीर्दधन्तु न इमं लोकमथो अमुम्। कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः॥ ४॥

पदपाठः— पावमानीः दधन्तु नः इमम् लोकम् अथ उ अमुम् कामान् सम् अर्द्धयन्तु नः देवीः देवैः समाहृताः सम् आहृताः॥ ४॥

अन्वयः—पावमानीः नः इमं लोकम्-अथ-उ-अमुम् दधन्तु देवीः देवैः समाहृताः नः कामान् समर्धयन्तु॥

पदार्थः—(पावमानीः) पवमान—सोम—परमात्मा की स्तुतियाँ (नः) हमारे लिये (इमं लोकम्-अथ-उ-अमुम्) इस पृथिवी लोक अर्थात् आभ्युदयिक जीवन को और उस लोक—मोक्षधाम अर्थात् निःश्रेयस-अध्यात्म जीवन को (दधन्तु) धारण करावें (देवीः) दिव्य गुण वाली वे स्तुतियाँ (देवैः समाहृताः) जीवन्मुक्तों द्वारा संज्ञापित—समझाई सिखाई हुई (नः) हमारी (कामान् समर्धयन्तु) कामनाओं को समृद्ध करें—सफल करें॥ ४॥

१३०२. येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमानीः पुनन्तु नः॥ ५॥

पदपाठः— **येन देवाः पवित्रेण आत्मानम् पुनते सदा तेन सहस्त्रधारेण सहस्त्र धारेण पावमानीः पुनन्तु नः ॥ ५ ॥**

अन्वयः—देवाः येन पवित्रेण आत्मानं सदा पुनते तेन सहस्त्रधारेण नः पावमानीः पुनन्तु ॥

पदार्थः—(देवाः) सुमुक्षु उपाजसकजन (येन पवित्रेण) जिस पवित्रकारक परमात्मा से—'उसके ध्यान दर्शन हो जाने पर' (आत्मानं सदा पुनते) अपने को सदा पवित्र करते हैं (तेन सहस्त्रधारेण) उस सहस्त्र आनन्द धारा वाले पवमान—परमात्मा के ध्यान दर्शन से (नः) हमें (पावमानीः पुनन्तु) स्तुतियाँ पवित्र करें ॥ ५ ॥

१३०३. **पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् । पुण्याँश्च भक्षान् भक्षयत्यमृतत्वं च गच्छति ॥ ६ ॥**

पदपाठः— **पावमानीः स्वस्त्ययनीः ताभिः गच्छति नान्दनम् पुण्यान् च भक्षान् भक्षयति अमृतत्वम् अ मृतत्वम् च गच्छति ॥ ६ ॥**

अन्वयः—पावमानीः स्वस्त्यनीः ताभिः नान्दनं-गच्छति च पुण्यान् भक्षान् भक्षयति अमृतत्वं च गच्छति ॥

पदार्थः—(पावमानीः स्वस्त्यनीः) पवमान—सोम—परमात्मा की स्तुतियाँ कल्याण प्राप्त कराने वाली हैं (ताभिः) उनके द्वारा—उनके सेवन से उपासक (नान्दनं-गच्छति) केवल सुख[१] मोक्ष को प्राप्त होता है (च) तथा (पुण्यान् भक्षान् भक्षयति) वहाँ मोक्ष में पुण्यभोगों को भोगता है (अमृतत्वं च गच्छति) और अमरत्व को पाता है ॥ ६ ॥

अष्टम खण्ड

प्रथम तृच

ऋषिः—वसिष्ठ (परमात्मा में अत्यन्त वसने वाला उपासक) ॥ देवता—अग्निः (अग्रणी ज्ञान प्रकाशक परमात्मा) ॥ छन्दः—त्रिष्टुप् ॥

१३०४. **अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे । चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १ ॥**

---

१. 'नन्दनं सुखम्' अनन्दनं नसुखं तत्प्रतिषिद्धम्–नान्दनम् ।

पदपाठः— **अगन्म महा नमसा यविष्ठम् यः दीदाय समिद्धः सम् इद्धः स्वे दुरोणे दुः ओने चित्रभानुम् चित्र भानुम् रोदसीइति अन्तः ऊर्वीइति स्वाहुतम् सु आहुतम् विश्वतः प्रत्यञ्चम् प्रति अञ्चम्॥ १ ॥**

अन्वयः—यः स्वे-दुरोणे समिद्धः दीदाय यविष्ठम् उर्वी रोदसी-अन्तः चित्रभानुम् विश्वतः प्रत्यञ्चम् स्वाहुतम् महा नमसा-अगन्म॥

पदार्थः—(यः) जो अग्नि—अग्रणी ज्ञानप्रकाशक परमात्मा (स्वे-दुरोणे) अपने घर मोक्षधाम में[1] (समिद्धः) सम्यक् दीप्त, स्वप्रकाश से प्रकाशित (दीदाय) जो विश्व को प्रकाशित करता है[2] उस (यविष्ठम्) अत्यन्त युवा—सदा अजर (उर्वी रोदसी-अन्तः) महान् द्युलोक पृथिवी लोक—विश्व के ओर छोर पर्यन्त[3] वर्तमान (चित्रभानुम्) चायनीय महनीय—प्रशंसनीय[4] ज्योति वाले (विश्वतः प्रत्यञ्चम्) सर्व ओर प्रतिगत ज्ञानदृष्टि से प्राप्त (स्वाहुतम्) हृदय में सम्यक् गृहीत—धारित को (महा नमसा-अगन्म) महान् नम्र-भाव-स्तवन से हम प्राप्त करें॥ १ ॥

१३०५. **स मह्ना विश्वा दुरितानि साह्वानग्नि ष्टवे दम आ जातवेदाः। स नो रक्षिषद् दुरितादवद्यादस्मान् गृणत उत नो मघोनः॥ २ ॥**

पदपाठः— **सः मह्ना विश्वा दुरितानि दुः इतानि साह्वान् अग्निः स्तवे दमे आ जातवेदाः जात वेदाः सः नः रक्षिषत् दुरितात् दुः इतात् अवद्यात् अस्मान् गृणतः उत नः मघोनः॥ २ ॥**

अन्वयः—सः जातवेदाः-अग्निः मह्ना विश्वा दुरितानि साह्वान् दमे आष्टवे सः नः रक्षिषत् अस्मान्-गृणतः-दुरितात् उत नः-मघोनः-अवद्यात्॥

पदार्थः—(सः) वह (जातवेदाः-अग्निः) उत्पन्नमात्र एवं प्रसिद्ध मात्र का जानने वाला अग्रणी ज्ञानप्रकाशक परमात्मा (मह्ना) अपने महत्त्व से (विश्वा दुरितानि साह्वान्) हमारे सब कष्टों दुःखों को दबाने दूर करने वाला है (दमे

---

१. "त्रिपादस्यामृतं दिवि" [ऋ० १०.९०.३]।

२. "दीदयति ज्वलतिकर्मा" [निरु० ६.१]।

३. "रोदसी रोधसी रोधः कूलम्" [निरु० ६.१] "रोदसी द्यावापृथिवीनाम" [निघं० ३.३०]

४. "चित्रं चायनीयं मंहनीयम्" [निघं० ४.४]।

आष्टवे) वह प्रास घर में समन्त रूप से स्तुति किया जाता है (सः) वह (नः) हमें हमारी (रक्षिषत्) रक्षा करे (अस्मान्-गृणतः-दुरितात्) हम स्तुति करने वालों की दुःखों से रक्षा करे (उत) अपि-और (नः-मघोनः-अवद्यात्) हम अध्यात्म-यज्ञ वालों या अध्यात्म धन वालों[1] की निन्दनीयरूप पाप से रक्षा करे ॥ २ ॥

१३०६. त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः। त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

पदपाठः— त्वम् वरुणः उत मित्रः मि त्रः अग्ने त्वाम् वर्द्धन्ति मतिभिः वसिष्ठाः त्वेइति वसु सुषणनानि सु सननानि सन्तु यूयम् पात स्वस्तिभिः सु अस्तिभिः सदा नः ॥ ३ ॥

अन्वयः—अग्ने त्वं वरुणः-उत मित्रः वसिष्ठाः मतिभिः त्वां वर्धन्ति त्वे सुषणानि वसु सन्तु यूयं स्वस्तिभिः-नः सदा पात ॥

पदार्थः—(अग्ने) हे अग्रणी ज्ञानप्रकाशक परमात्मन्! (त्वं वरुणः-उत मित्रः) तू वरने वाला—अपनी ओर मोक्षार्थ वरण करने वाला और संसार में श्रेष्ठकर्म करणार्थ प्रेरित करने वाला है (वसिष्ठाः) तेरे में अत्यन्त वसने वाले उपासकजन (मतिभिः) स्तुति वाणियों से[2] (त्वां वर्धन्ति) तुझे अपने अन्दर बढ़ाते हैं—अधिकाधिक साक्षात् करते हैं (त्वे) तेरे साक्षात् हो जाने पर (सुषणानि वसु सन्तु) सुखसम्भाजक धन—अध्यात्मधन हो (यूयं स्वस्तिभिः-नः सदा पात) तुम[3] कल्याणसाधनों से हमारी रक्षा करो ॥ ३ ॥

द्वितीय तृच

ऋषिः—वत्सः (स्तुतिवचन बोलने वाला)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—गायत्री॥

१३०७. महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्वत्सस्य वावृधे ॥ १ ॥

पदपाठः— महान् इन्द्रः यः ओजसा पर्जन्योवृष्टिमाꣳइव स्तोमैः वत्सस्य वावृधे ॥ १ ॥

---

१. ''यज्ञेन मघवान् भवति'' [तै० ४.४.८.१]।

२. ''वाग्वै मतिः'' [शत० ८.१.२.७]।

३. ''यूयम्'' बहुवचनमादरार्थम्।

अन्वयः—यः इन्द्रः ओजसा महान् वृष्टिमान् पर्जन्यः-इव वत्सस्य स्तोमैः-वावृधे ॥

पदार्थः—(यः) जो (इन्द्रः) ऐश्वर्यवान् परमात्मा (ओजसा महान्) निज ऐश्वर्यबल से महान् (वृष्टिमान् पर्जन्यः-इव) वृष्टि करने वाले मेघ के समान सुख वृष्टि करने वाला (वत्सस्य स्तोमैः-वावृधे) वक्ता—स्तुतिकर्ता के स्तुतिवचनों से अधिकाधिक साक्षात् होता जाता है वह उपासनीय है ॥ १ ॥

१३०८. **कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। जामि ब्रुवत आयुधा ॥ २ ॥**

पदपाठः— **कण्वाः इन्द्रम् यत् अक्रत स्तोमैः यज्ञस्य साधनम् जामि ब्रुवते आयुधा ॥ २ ॥**

अन्वयः—कण्वाः स्तोमैः इन्द्रं यज्ञस्य साधनम्-अक्रत आयुधा जामि ब्रुवत् ॥

पदार्थः—(कण्वाः) स्तुतिवक्ता मेधावीजन[1] (स्तोमैः) स्तुतिसमूहों से (इन्द्रं यज्ञस्य साधनम्-अक्रत) ऐश्वर्यवान् परमात्मा को अध्यात्मयज्ञ का साधन करते हैं बनाते हैं (आयुधा जामि ब्रुवत्) आयोध[2]—आक्रमण करने वाले काम आदि दोषों को बालिश[3] तुच्छ अकिञ्चित्कर कहते हैं—मानते हैं ॥ २ ॥

१३०९. **प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः। विप्रा ऋतस्य वाहसा ॥ ३ ॥**

पदपाठः— **प्रजाम् प्र जाम् ऋतस्य पिप्रतः प्र यत् भरन्त वह्नयः विप्राः वि प्राः ऋतस्य वाहसा ॥ ३ ॥**

अन्वयः—पिप्रतः-ऋतस्य प्रजाम् यद् 'यदा' प्रभरन्तः—वह्नयः विप्राः ऋतस्य वाहसा ॥

पदार्थः—(पिप्रतः-ऋतस्य) विश्व को पूरण करने[4] विश्व में व्यापने वाले अमृतरूप परमात्मा के[5] (प्रजाम्) प्रजायमान प्रसिद्ध मधु[6] आनन्द को (यद् 'यदा') ज़ब (प्रभरन्तः—वह्नयः) अपने अन्दर प्रकृष्ट रूप से धारण करने हेतु स्तुति से पहुँचाने वाले[7] स्तोता उपासक (विप्राः) मेधावीजन (ऋतस्य वाहसा) अमृतरूप परमात्मा के वाहक स्तुतिसमूह से परमात्मा को वहन करते हैं ॥ ३ ॥

---

१. "कण भाषार्थः" [भ्वादिः] "कण्वः-मेधाविनाम" [निघं० ३.१५]।
२. "आयुधमायोधनात्" [निरु० १०.६]।
३. "जामिः बालिशस्य नाम" [निरु० ४.२०]।
४. "पृ पालनपूर्णयोः" [जुहो०]।
५. "ऋतममृतमित्याह" [जै० २.१६०]।
६. "प्रजा वै मधु" [जै० २.१४४]।
७. "वह्नयो वोढारः" [निरु० ८.४]।

नवम खण्ड

प्रथम तृच

ऋषिः—वैखानसः (परमात्मा को विशेष खनन करने खोजने में कुशल)॥
देवता—पवमानः सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री॥

१३१०. पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः॥ १॥

पदपाठः— पवमानस्य जिघ्नतः हरेः चन्द्राः असृक्षत जीराः अजिरशोचिषः अजिर शोचिषः॥ १॥

अन्वयः—जिघ्नतः अजिर-शोचिषः हरेः पवमानस्य जीराः-चन्द्राः-असृक्षत॥

पदार्थः—(जिघ्नतः) दुःख दोषों को नष्ट करते हुए (अजिर-शोचिषः) गमन व्यापनशील तेज वाले (हरेः) सुखाहर्ता (पवमानस्य) धारारूप में प्राप्त होने वाले शान्तस्वरूप परमात्मा की (जीराः-चन्द्राः-असृक्षत) शीघ्रगति वाली[1] आह्लादकारी आनन्दधारायें हम उपासकों पर बरस रही हैं॥ १॥

१३११. पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः॥ २॥

पदपाठः— पवमानः रथीतमः शुभ्रेभिः शुभ्रशस्तमः शुभ्र शस्तमः हरिश्चन्द्रः हरि चन्द्रः मरुद्गणः मरुत् गणः॥ २॥

१३१२. पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम्॥ ३॥

पदपाठः— पवमान वि अश्नुहि रश्मिभिः वाजसातमः वाज सातमः दधत्स्तोत्रेसुवीर्यम्॥ ३॥

इन दोनों मन्त्रों की एकवाक्यता है—

अन्वयः—पवमान रथीतमः शुभ्रेभिः-शुभ्रशस्तमः हरिः चन्द्रः मरुद्गणः वाजसातमः पवमानः रश्मिभिः स्तोत्रैः सुवीर्यं दधत् व्यश्नुहि॥

पदार्थः—(पवमान) हे धारारूप में प्राप्त होने वाले परमात्मन्! तू (रथीतमः) अत्यन्त रसवाला[2] (शुभ्रेभिः-शुभ्रशस्तमः) तेजों से अति तेजस्वी (हरिः) अज्ञानहर्ता (चन्द्रः) आह्लादक (मरुद्गणः) मुमुक्षुओं की स्तुति वाणी

---

१. "जोरी च रक्" [उणा० २.२३] "जीरा क्षिप्रनाम" [निघं० ३.१५]।
२. "तं वा एतं सन्तं रथ इत्याचक्षते" [गो० १.२.५१]।

जिसके लिए ऐसा[१] (वाजसातमः) आत्मबल को अत्यन्त देने वाला (पवमानः) अध्येष्यमाणप्रार्थना में लाया हुआ (रश्मिभिः) अपनी आनन्दरश्मियों—धाराओं से (स्तोत्रैः) तुझ स्तोता उपासक के लिये (सुवीर्यं दधत्) शोभन बल धारण कराता हुआ (व्यश्नुहि) व्याप्त हो ॥ २-३ ॥

द्वितीय तृच

ऋषिः—सप्तर्षयः (ज्ञान में पारङ्गत उपासकजन)॥ देवता—पवमानः सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—प्रगाथः (जगती)॥

१३१३. **परीतो षिञ्चता सुतं सोमो य उत्तमं हविः। दधन्वाँ यो नर्यो अप्स्वा३ऽन्तरा सुषाव सोममद्रिभिः॥ १॥**

पदपाठः— **परीतोषिञ्चतासुतम्॥ १॥**

(देखो अर्थव्याख्या मन्त्र संख्या ५१२)

१३१४. **नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः। सुते चित्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम्॥ २॥**

पदपाठः— **नूनम् पुनानः अविभिः परि स्रव अदब्धः अ दब्धः सुरभिन्तरः सु रभिन्तरः सुते चित् त्वा अप्सु मदामः अन्धसा श्रीणन्तः गोभिः उत्तरम्॥ २॥**

अन्वयः—अदब्धः सुरभिरः पुनानः अविभिः परिस्रव सुतेचित् अन्धसा-अप्सु त्वा उत्तरम् गोभिः श्रीणन्तः नूनं मदामः॥

पदार्थः—(अदब्धः) हे सोम—परमात्मन्! तू अबाधित (सुरभिन्तरः) अति शोभन जीवन निर्माणकर्ता प्राणों का प्राण[२] (पुनानः) प्रार्थना किया हुआ (अविभिः परिस्रव) प्राप्तिसाधनों—योगाभ्यासों के द्वारा[३] हृदय में परिप्राप्त हो (सुतेचित्) तेरे साक्षात् हो जाने पर (अन्धसा-अप्सु त्वा) आध्यान, स्मरण, चिन्तन से तुझे प्राणों में[४] (उत्तरम्) पश्चात् (गोभिः श्रीणन्तः) इन्द्रियों में मिलाते हुए (नूनं मदामः) निश्चय हम हर्षित—आनन्दित होते हैं। हृदय में साक्षात् परमात्मा प्राणों इन्द्रियों में सुख सञ्चार करता है॥ २॥

१३१५. **परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः॥ ३॥**

---

१. "मरुतो ह वै देवविशः" [कौ० ७.८]।
"गणाः-वाङ्नाम" [निघं० १.११] असमानविभक्तिको बहुव्रीहिः।
२. "प्राणा वै सुरभयः" [तै० ३.९.७.५]।
३. "अव रक्षणगति" [भ्वादि०]।
४. "आपो वै प्राणः" [श० ४.८.२.२]।

पदपाठः— **परि स्वानः चक्षसे देवमादनः देव मादनः क्रतुः इन्दुः विचक्षणः वि चक्षणः ॥ ३ ॥**

अन्वयः—इन्दुः देवमादनः विचक्षणः क्रतुः स्वानः चक्षसे परि ॥

पदार्थः—(इन्दुः) आनन्दरसपूर्ण परमात्मा (देवमादनः) मुमुक्षु उपासकों का हर्षाने वाला (विचक्षणः) सर्वज्ञ (क्रतुः) जगत् रचयिता (स्वानः) उपासित हुआ (चक्षसे) उपासक के दर्शनार्थ (परि) परिप्राप्त होता है ॥ ३ ॥

तृतीय खण्ड

ऋषिः—वसुः (परमात्मा में वसने वाला आत्मा) ॥ देवता—सोमः (शान्तस्वरूप परमात्मा) ॥ छन्दः—जगती ॥

१३१६. **असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् । पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥ १ ॥**

पदपाठः— **असाविसोमोअरुषोवृषाहरिः ॥ १ ॥**

(देखो अर्थव्याख्या मन्त्र संख्या ५६२)

१३१७. **पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे । स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे ॥ २ ॥**

पदपाठः— **पर्जन्यः पिता महिषस्य पर्णिनः नाभा पृथिव्याः गिरिषु क्षयम् दधे स्वसारः आपः अभिगाः उदासरन् उत् आसरन् सम् ग्रावभिः वसते वीते अध्वरे ॥ २ ॥**

अन्वयः—महिषस्य पर्णिनः पर्जन्यः पिता पृथिव्या-नाभा गिरिषु क्षयं दधे स्वसारः-आपः-अधि गाः-उदासरन् वीते-अध्वरे ग्रावभिः-'ग्रावाणः' संवसते ॥

पदार्थः—(महिषस्य पर्णिनः) महान्[1] पर्णी—पर्ण—पालन—प्रशस्त पालन धर्म वाला[2] (पर्जन्यः) तृप्तिकर्ता[3] (पिता) पालक सोम—शान्त परमात्मा (पृथिव्या-नाभा) पार्थिव शरीर के मध्य में (गिरिषु क्षयं दधे) स्तुतिसाधनों[4] मन, बुद्धि, चित्त, अहङ्कार और वाणी में स्थान बनाता है (स्वसारः-आपः-अधि गाः-उदासरन्)

---

१. ''महिषः-महन्नाम'' [निघं० ३.९]।
२. ''द्वा सुपर्णा सयुजा सखाया'' [ऋ० १.१६४.२०] व्यत्ययेन प्रथमास्थाने षष्ठी।
३. ''पर्जन्यः-तृपेराद्यन्तविपरीतस्य'' [निरु० १०.११]।
४. ''गृणाति स्तुतिकर्मा'' [निघं० ३.५] ततः-इः किच्च।

स्तुति वाणियों को अधिकृत कर स्वसरणशील उपासकजन[१] ऊँचे उठते हैं (वीतेअध्वरे) प्राप्त अध्यात्मयज्ञ में अवसर पर (ग्रावभिः–'ग्रावाणः') वे स्तुति करने वाले विद्वान् जन[२] (संवसते) आच्छादन—रक्षण प्राप्त करते हैं ॥ २ ॥

१३१८. कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि। अपसेधन् दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ॥ ३ ॥

पदपाठः— कविः वेधस्या परि एषि माहिनम् अत्यः न मृष्टः अभि वाजम् अर्षसि अपसेधन् अप सेधन् दुरिता दुः इता सोम नः मृड घृता वसानः परि यासि निर्णिजम् निः निजम् ॥ ३ ॥

अन्वयः—सोमः कविः वेधस्या माहिनम् पर्येषि अत्यः–नः–मृष्टः–वाजम्–अभि–अर्षसि दुरिता–अपसेधन् नः–मृड घृतावसानः निर्णिजं परियासि ॥

पदार्थः—(सोमः) हे शान्तस्वरूप परमात्मन्! तू (कविः) क्रान्तदर्शी सर्वज्ञ (वेधस्या) विधातृभावना से[३] (माहिनम्) प्रथित संसार को[४] (पर्येषि) परिप्राप्त हो रहा है (अत्यः–नः–मृष्टः–वाजम्–अभि–अर्षसि) घोड़े के समान स्तुति द्वारा प्रेरित अध्यात्म या ध्यान यज्ञ[५] को प्राप्त होता है (दुरिता–अपसेधन्) दुःखों को दूर करता हुआ (नः–मृड) हमें सुखी कर (घृतावसानः) तेज को[६] आच्छादित[७] करता हुआ—उस पर अधिकार करता हुआ (निर्णिजं परियासि) पवित्र उपासक को परिप्राप्त होता है ॥ ३ ॥

दशम खण्ड

प्रथम द्व्यृच

ऋषिः—नृमेधः (मुमुक्षु मेधावाला उपासक)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—बृहती ॥

१३१९. श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ १ ॥

पदपाठः— श्रायन्तइवसूर्यम् ॥ १ ॥

---

१. "मनुष्या वा आपश्चन्द्राः" [श० ७.३.१.२०]।
२. "विद्वांसो हि ग्रावाणः" [श० ३.९.३.१४]। ३. "वेधसे विधात्रे" [निरु० १०.६]।
४. "इयं वै माहिनम्" [ऐ० ३.३८]। ५. "मार्ष्टि गतिकर्मा" [निघं० २.१४]।
६. "वाजं त्वा सरिष्यन्तं.....यज्ञं त्वा........." [श० १.४.३.१५]।
७. "तेजो वै घृतम्" [मै० १.४.८]।

(देखो अर्थव्याख्या मन्त्र संख्या २६७)

१३२०. अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः। यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्॥ २॥

पदपाठः— अलर्षिरातिम् अलर्षि रातिम् वसुदाम् वसु दाम् उप स्तुहि भद्राः इन्द्रस्य रातयः यः अस्य कामम् विधतः न रोषति मनः दानाय चोदयन्॥ २॥

अन्वयः—इन्द्रस्य रातिम्-अलर्षि वसुदाम्-उपस्तुहि भद्राः-रातयः अस्य विदधतः कामं यः-न रोषति मनः दानाय चोदयन्॥

पदार्थः—(इन्द्रस्य रातिम्-अलर्षि) हे उपासक! तू ऐश्वर्यवान् परमात्मा के दान को प्राप्तकर्ता है[1] (वसुदाम्-उपस्तुहि) उस धनदाता की उपासना कर (भद्राः-रातयः) उनके दान कल्याणकारी हैं (अस्य विदधतः) उस तुझ परिचरण करते हुए—उपासना करते हुए की[2] (कामं यः-न रोषति) कामना को जो नष्ट नहीं करता है (मनः दानाय चोदयन्) तेरे मन को दान के हेतु—आत्मदान—आत्मसमर्पण के हेतु॥ २॥

द्वितीय द्व्यृच

ऋषिः—भर्गः (तेजस्वी उपासक)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—बृहती॥

१३२१. यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि॥ १॥

पदपाठः— यतइन्द्रभयामहे॥ १॥

(देखो अर्थव्याख्या मन्त्र संख्या २७४)

१३२२. त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधर्ता। तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे॥ २॥

पदपाठः— त्वम् हि राधसः पते राधसः महः क्षयस्य असि विधर्त्ता वि धर्त्ता तम् त्वा वयम् मघवन् इन्द्र गिर्वणः गिः वनः सुतावन्तोहवामहे॥ २॥

---

१. "दाधर्ति-अलर्षि......." [अष्टा० ७.३.६२] इति निपातनम्।

२. "विधेम परिचरणकर्मा" [निघं० ३.५]।

अन्वयः—राधसः-पते गिर्वणः-मघवन्-इन्द्र त्वं हि महः-राधसः क्षयस्य विधर्ता-असि तं त्वा वयं सुतावन्तः-हवामहे ॥

पदार्थः—(राधसः-पते गिर्वणः-मघवन्-इन्द्र) हे हमारे लिये धन के पालक रक्षक स्तुतियों से वननीय सम्भजनीय अध्यात्मयज्ञ के आधार[१] ऐश्वर्यवन् परमात्मन्! (त्वं हि महः-राधसः क्षयस्य विधर्ता-असि) तू ही महान् धन—मोक्षैश्वर्य एवं महान् निवास मोक्षधाम का विधानकर्ता—प्रदाता और आधार है (तं त्वा) उस तुझ को (वयं सुतावन्तः-हवामहे) हम उपासनारस वाले आमन्त्रित करते हैं ॥ २ ॥

एकादश खण्ड

प्रथम तृच

ऋषिः—भरद्वाजः (अमृत अन्नभोग अपने अन्दर भरण—धारण करनेवाला उपासक)॥ देवता—पवमानः सोमः (धारारूप में प्राप्त होने वाला शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री ॥

१३२३. त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः ॥ १ ॥

पदपाठः— त्वम् सोम असि धारयुः मन्द्रः ओजिष्ठः अध्वरे पवस्व मंऽहयद्रयिः मंऽहयत् रयिः ॥ १ ॥

अन्वयः—सोमः त्वम् अध्वरे धारयुः मन्द्रः मंहयद्रयिः पवस्व ॥

पदार्थः—(सोमः) हे शान्तस्वरूप परमात्मन्! (त्वम्) तू (अध्वरे) मेरे अध्यात्मयज्ञ—ध्यानसमाधि में (धारयुः) धाराप्रवाह वाला—धाराप्रवाह में आता हुआ (मन्द्रः) हर्षकारी अत्यन्त ओजस्वी—आत्मबल देने वाला (मंहयद्रयिः) दातव्य धन वाला (पवस्व) प्राप्त हो ॥ १ ॥

१३२४. त्वं सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः। इन्दुः सत्राजिदस्तृतः ॥ २ ॥

पदपाठः— त्वम् सुतः मदिन्तमः दधन्वान् मत्सरिन्तमः इन्दुःसत्राजिदस्तृतः ॥ २ ॥

अन्वयः—त्वम् सुतः मदिन्तमः दधन्वान् मत्सरिन्तमः इन्दुः सत्राजित् अस्तृतः ॥

पदार्थः—(त्वम्) हे परमात्मन्! (सुतः) साक्षात् हुआ (मदिन्तमः) अति-हर्षकारी (दधन्वान्) उपासकों का धारणकर्ता (मत्सरिन्तमः) अधिक तृप्तिकर (इन्दुः) रसीला (सत्राजित्) सबको जीतने वाला (अस्तृतः) अविचलित है अतः

---

१. ''यज्ञेन मघवान्'' [तै० सं० ४.४.८.१]।

उपास्य है॥ २॥

१३२५. त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममा भर॥ ३॥

पदपाठः— **त्वम् सुष्वाणः अद्रिभिः अ द्रिभिः अभि अर्ष कनिक्रदत् द्युमन्तम् शुष्मम् आ भर॥ ३॥**

अन्वयः—त्वम् अद्रिभिः सुष्वाणः कनिक्रदत् अभि-अर्ष द्युमन्तं शुष्मम्-आभर॥

पदार्थः—(त्वम्) हे सोम—परमात्मन्! तू (अद्रिभिः सुष्वाणः) स्तुतिकर्ता उपासकों द्वारा उपासित (कनिक्रदत्) साधु प्रवचन करता हुआ (अभि-अर्ष) प्राप्त हो (द्युमन्तं शुष्मम्-आभर) दीप्ति वाले बल को हमारे अन्दर आभरित कर॥ ३॥

द्वितीय तृच

ऋषिः—आप्सवो मनुः (देह में व्याप्त अभोक्ता परमात्मा का मनन करने वाला उपासक)॥ देवता—पवमानः सोमः (धारारूप में प्राप्त होने वाला शान्तस्वरूप परमात्मा)॥ छन्दः—उष्णिक्॥

१३२६. पवस्व देववीतय इन्दो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः॥ १॥

पदपाठः— **पवस्वदेववीतये॥ १॥**

(देखो अर्थव्याख्या मन्त्र संख्या ५७१)

१३२७. तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः॥ २॥

पदपाठः— **तव द्रप्साः उदप्रुतः उद प्रुतः इन्द्रम् मदाय वावृधुः त्वाम् देवासः अमृताय अ मृताय कम् पपुः॥ २॥**

अन्वयः—तव द्रप्साः-उदप्रुतः मदाय इन्द्रं वावृधुः देवासः अमृताय त्वां कं पपुः॥

पदार्थः—(तव द्रप्साः-उदप्रुतः) हे इन्दो सोम—रसपूर्ण परमात्मन् तेरे आनन्दविन्दु रसभरे रसीले (मदाय) 'मदेन' हर्ष से[1] (इन्द्रं वावृधुः) आत्मा को बढ़ाते हैं (देवासः) मुमुक्षु (अमृताय) अमर होने के लिये (त्वां कं पपुः) तुझ सुखस्वरूप को पान करते हैं॥ २॥

---

१. विभक्तिव्यत्ययः।

१३२८. आ नः सुतास इन्दवः पुनाना धावता रयिम्। वृष्टिद्यावो रीत्यापः स्वर्विदः॥ ३ ॥

पदपाठः— आ नः सुतासः इन्दवः पुनानाः धावत रयिम् वृष्टिद्यावः वृष्टि द्यावः रीत्यापः रीति आपः स्वर्विदः स्वः विदः॥ ३ ॥

अन्वयः—सुतासः पुनानाः इन्दवः रयिम् नः आधावत वृष्टिद्यावः रीत्यापः स्वर्विदः॥

पदार्थः—(सुतासः) उपासित (पुनानाः) पवित्र करने वाले (इन्दवः) आनन्दरसपूर्ण परमात्मन्[1] (रयिम्) पोष—अध्यात्मपोष उत्कर्ष को[2] (नः) हमारे लिये (आधावत) प्राप्त करा (वृष्टिद्यावः) दीप्तवृष्टि वाला तेजवर्षक—ज्योतिःप्रेरक (रीत्यापः) श्रवणप्रवाह वाला[3] (स्वर्विदः) मोक्ष प्राप्त कराने वाला परमात्मा॥ ३ ॥

तृतीय तृच

ऋषिः—अम्बरीषः (हृदयाकाश में परमात्मा को प्राप्त करने वाला उपासक)॥
देवता—पवमानः सोमः (धारारूप में प्राप्त होने वाला शान्तस्वरूप परमात्मा)॥
छन्दः—उष्णिक्॥

१३२९. परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वा इत्परि मदेन सह गच्छति॥ १ ॥

पदपाठः— परि त्यꣳ हर्यतꣳ हरिम्॥ १ ॥
(देखो अर्थव्याख्या मन्त्र संख्या ५५२)

१३३०. द्विर्यं पञ्च स्वयशसं सखायो अद्रिसंहतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः॥ २ ॥

पदपाठः— द्विः यम् पञ्च स्वयशसम् स्व यशसम् सखायः स खायः अद्रिसꣳहतम् अद्रि सꣳहतम् प्रियम् इन्द्रस्य काम्यम् प्रस्नापयन्ते प्र स्नापयन्ते ऊर्मयः॥ २ ॥

अन्वयः—त्यं-अद्रिसंहतम् स्वयशसम् इन्द्रस्य प्रियं काम्यं द्विः पञ्च सखायः ऊर्मयः प्रस्नापयन्त॥

---

१. बहुवचनमादरार्थम्।
२. ''रयिं देहि पोषं देहि'' [काठ० १.७]।
३. ''रीङ् श्रवणे'' [दिवादि०]।

पदार्थः—(त्यं-अद्रिसंहतम्) जिस श्लोककृत्[1] स्तुतिकर्ताओं से सङ्गत—स्तुतिकर्ताओं को प्राप्त होने वाले (स्वयशसम्) स्वाधार यशोरूप[2] (इन्द्रस्य प्रियं काम्यं) आत्मा को प्रिय कमनीय सोम—शान्तस्वरूप परमात्मा को (द्विः पञ्च सखायः) दश प्राण—इन्द्रिय शक्तियाँ[3] मनन श्रवण स्तवन आदि (ऊर्मयः) ऊर्मिरूप उन्नत हुई (प्रस्नापयन्त) प्रख्यात कराते हैं—साक्षात् कराते हैं ॥ २ ॥

१३३१. इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ॥ ३ ॥

पदपाठः— इन्द्राय सोम पातवे वृत्रघ्ने वृत्र घ्ने परि सिच्यसे नरे च दक्षिणावते वीराय सदनासदे सदन सदे ॥ ३ ॥

अन्वयः—सोम वृत्रघ्ने दक्षिणावते वीराय सदनासदे नरे इन्द्राय पातवे परिषिच्यसे ॥

पदार्थः—(सोम) हे शान्तस्वरूप परमात्मन्! तू (वृत्रघ्ने) पाप नष्ट कर चुका जो उस निष्पाप[4] (दक्षिणावते) कामवान्—कामना वाले[5] (वीराय) कर्मशील—स्वतन्त्र कर्म करने वाले (सदनासदे) शरीर या हृदय सदन में बैठने वाले (नरे) मुमुक्षु[6] (इन्द्राय) आत्मा के (पातवे) पान—धारण करने को (परिषिच्यसे) प्रार्थित किया जाता है ॥ ३ ॥

चतुर्थ तृच

ऋषिः—ऋणत्रसदस्यू ऋषी (ऋण-त्रास को क्षीणकर्ता जपपरायण स्वाध्यायशील)॥ देवता—पवमानः सोमः (धारारूप में प्राप्त होने वाला शान्तस्वरूप परमात्मा)॥ छन्दः—द्विपदा विराट्॥

१३३२. पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १ ॥

पदपाठः— पवस्वसोम ॥ १ ॥

(देखो अर्थव्याख्या मन्त्र संख्या ४३०)

---

१. "अद्रिरसि श्लोककृत्" [काठ० १.५]।
२. "यस्य नाम महद् यशः" [यजु० ३२.३]।
३. "प्राणो वै सखा" [श० १.८.१.२]।
४. सर्वत्र चतुर्थी षष्ठ्यर्थे "षष्ठ्यर्थे चतुर्थीत्यपि" [अष्टा० २.३.६२] "पाप्मा वै वृत्रः" [श० ११.३.५.७] "शर्यणावति सोममिन्द्रः पिबतु वृत्रहा"।
५. "दक्षिणा कामः" [मै० १.९.४]।
६. "नरो ह वै देवविशः" [जै० १.८९]।

१३३३. प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ २ ॥

पदपाठः— प्र ते सोतारः रसम् मदाय पुनन्ति सोमम् महे द्युम्नाय ॥ २ ॥

अन्वयः—ते सोतारः मदाय महे द्युम्नाय सोमं रसं प्रपुनन्ति ॥

पदार्थः—(इन्द्राग्नी) हे ऐश्वर्यवन् एवं ज्ञानप्रकाशस्वरूप परमात्मन्! (दिवः-रोचना) तू मोक्षधाम का प्रकाशक है (वाजेषु परिभूषथः) अर्चनावसरों में[४] सर्वतः भूषित होता है, (वाम्) तुझ को (वीर्यं तत् प्रचेति) तेरा जो गुण सामर्थ्य है वह तुझे जनाता है॥ १॥

---

१. "वृकः स्तेनाम" [निघं० ३.२४]।
२. "उरामथिः-उरणमथिः, उरणवान्, ऊर्णा वृणोतेरूणोतेर्वा" [निरु० ५.२१]।
३. "वञ् वरणे" [स्वादि०] ततः-ण्यश्छान्दसः।
४. "वाजयति अर्चतिकर्मा" [निघं० ३.१४]।

१६९४. इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या ३ अनु॥ २॥

पदपाठः— इन्द्राग्नीअपसस्परि॥ २॥

(देखो अर्थव्याख्या मन्त्र संख्या १५७७)

१६९५. इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम्॥ ३॥

पदपाठः— इन्द्राग्नीतविषाणिवाम्॥ ३॥

(देखो अर्थव्याख्या मन्त्र संख्या १५७८)

षष्ठ तृच

ऋषिः—मेधातिथिः (मेधा से परमात्मा में अतन प्रवेश करने वाला)॥
देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—गायत्री॥

१६९६. क ईं वेद सुते सचा पिबन्तं कद्वयो दधे। अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः॥ १॥

पदपाठः— कईंवेदसुतेसचा॥ १॥

(देखो अर्थव्याख्या मन्त्र संख्या २९७)

१६९७. दाना मृगो न वारणः पुरुत्रा चरथं दधे। न किष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा॥ २॥

पदपाठः— दाना मृगः न वारणः पुरुत्रा चरथम् दधे न किः त्वा नि यमत् आ सुते गमः महान् चरसि ओजसा॥ २॥

अन्वयः—दाना मृगः न वारणः पुरुत्रा चरथं दधे सुते आगमः न किः-त्वा नियमत् महान्-ओजसा-चरसि॥

पदार्थः—(दाना) दान से[१] आत्मदान—आत्मसमर्पण द्वारा (मृगः) अन्वेषणीय[२] (न) इस जीवन में ही[३] (वारणः) वारक—वरने वाला[४] इन्द्र ऐश्वर्यवान् परमात्मा (पुरुत्रा चरथं दधे) उपासक के बहुत अध्यात्म प्रसङ्गों में चरण—प्रापण—समागम धारण करता है (सुते) साक्षात् प्रसिद्ध होने के निमित्त (आगमः) तू आता है (न

---

१. ''टा विभक्तेः स्थाने-आकारादेशश्छान्दसः।''
२. ''मृग अन्वेषणे'' [चुरादि०]। ३. ''नः सम्प्रत्यर्थे'' [निरु० ६.८]।
४. ''वृञ् वरणे'' [स्वादि०] ल्युप्रत्यये नन्दनो यथा।

किः–त्वा नियमत्) न कोई तुझे रोक सकता है, कारण कि तू (महान्–ओजसा–चरसि) महान् है, निज आत्मबल से गति करता है ॥ २ ॥

१६९८. **य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः। यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ ३ ॥**

पदपाठः— **यः उग्रः सन् अनिष्टृतः अ निष्टृतः स्थिरः रणाय सꣳस्कृतः सम् कृतः यदि स्तोतुः मघवा शृणवत् हवम् न इन्द्रः योषति आ गमत् ॥ ३ ॥**

अन्वयः—यः उग्रा–अनिष्टृतः स्थिरः सन् रणाय संस्कृतः स्तोतुः–हवम् यदि–यद्–इ मघवा शृणवत् इन्द्रः–न योषति आगमत् ॥

पदार्थः—(यः) जो (उग्रा–अनिष्टृतः) तेजस्वी नितान्त किसी प्रकार हिंसित न होने वाला—अविनाशी (स्थिरः) एकरस रहने वाला (सन्) होता हुआ (रणाय संस्कृतः) रमण करने के लिये[१] उपासना द्वारा सम्यक् उपासित या साक्षात्कृत है (स्तोतुः–हवम्) स्तुतिकर्ता के प्रार्थनावचन या आमन्त्रण को (यदि–यद्–इ) जब कि (मघवा शृणवत्) ऐश्वर्यवान् परमात्मा सुन ले—सुन लेता है (इन्द्रः–न योषति) परमात्मा उपासक से पृथक् नहीं होता, किन्तु (आगमत्) उपासक को समन्तरूप से प्राप्त रहता है ॥ ३ ॥

चतुर्थ खण्ड

प्रथम तृच

ऋषिः—निध्रुविः (नियत स्थिर वृत्ति वाला उपासक)॥ देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री ॥

१६९९. **पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ॥ १ ॥**

पदपाठः— **पवमानाअसृक्षत सोमाः शुक्रासः इन्दवः अभिविश्वानिकाव्या ॥ १ ॥**

अन्वयः—पवमानाः शुक्रासः इन्दवः सोमाः विश्वानि काव्या असृक्षत ॥

पदार्थः—(पवमानाः) धारारूप में प्राप्त होने वाला (शुक्रासः) शुभ्र निर्मल अधर्माज्ञान दोषरहित (इन्दवः) आनन्दरसपूर्ण (सोमाः) शान्तस्वरूप परमात्मा[२] (विश्वानि काव्या) सब वेदरूप काव्यों को[३] अभिलक्षित कर—उनके अनुसार

---

१. ''नाहमिन्द्राणि रारणे–नाहमिद्राणि रमे'' [निरु० ११.३१]।

२. सर्वत्र बहुवचनमादरार्थम्।

३. ''त्रयी वै विद्या काव्यं छन्दः'' [श० ८.५.२.७]।

उपासित हो उपासक के अन्दर (असृक्षत) पहुँचता है ॥ १ ॥

१७००. पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि ॥ २ ॥

पदपाठः— पवमानाः दिवः परि अन्तरिक्षान् असृक्षत पृथिव्याअधिसानवि ॥ २ ॥

अन्वयः—पवमानाः दिवः-अन्तरिक्षात् पृथिव्याः-अधिसानवि असृक्षत ॥

पदार्थः—(पवमानाः) आनन्दधारा में प्राप्त होने वाला परमात्मा (दिवः-अन्तरिक्षात् परि) द्युलोक में अन्तरिक्षलोक में[1] (पृथिव्याः-अधिसानवि) पृथिवीलोक में वर्तमान इनके सम्भजन स्थान—उपासनास्थान—आत्मा के उपकरण मूर्धा[2] हृदय[3] और शरीर[4] में कर्मेन्द्रियगण में (असृक्षत) उपासना द्वारा पहुँचता है जिससे क्रमशः सद्विचार सद्भाव सदाचार प्रवाहित होता रहता है ॥ २ ॥

१७०१. पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ॥ ३ ॥

पदपाठः— पवमानासः आशवः शुभ्राः असृग्रम् इन्दवः घ्नतः विश्वाः अप द्विषः ॥ ३ ॥

अन्वयः—आशवः शुभ्राः पवमानासः इन्दवः विश्वाः-द्विषः अपघ्नन्तः असृग्रम् ॥

पदार्थः—(आशवः) व्यापनशील (शुभ्राः) शुभ्र—निर्मल (पवमानासः) धारारूप में प्राप्त होनेवाला (इन्दवः) आनन्दरसपूर्ण परमात्मा (विश्वाः-द्विषः) सारी द्वेष-भावनाओं को (अपघ्नन्तः) नष्ट करता हुआ (असृग्रम्)[5] आत्मा के अन्दर पहुँचता है ॥ ३ ॥

द्वितीय तृच

ऋषिः—विश्वामित्र (सब का मित्र या सब जिसके मित्र हैं) ॥ देवता—इन्द्राग्नी (ऐश्वर्यवान् और ज्ञानप्रकाशस्वरूप परमात्मा) ॥ छन्दः—गायत्री ॥

१७०२. तोशा वृत्रहणा हुवे सजित्वानापराजिता। इन्द्राग्नी वाजसातमा ॥ १ ॥

---

१. ''पञ्चम्याः परावध्यर्थे'' [अष्टा० ८.३.५१] इति सकारः।

२. ''एतद्वै प्रत्यक्षं दिवोरूपं यन्मूर्धा'' [जै० २.४०४]।

३. ''तद्यदस्मिन्निदं सर्वमन्तस्तः-यदन्तर्यक्षम्। अन्तर्यक्षं ह वै नामैतत्। तदन्तरिक्षमिति'' [जै० उ० १.६.१.५]।

४. ''यच्छरीरं सा पृथिवी'' [ऐ० आ० २.३.३]।

५. ''पुरुषवचनव्यत्ययश्छान्दसः।''

पदपाठः— **तोशा वृत्रहणा वृत्र हना हुवे सजित्वाना स जित्वाना अपराजिता अ पराजिता इन्द्राग्नी इन्द्र अग्नीइति वाजसातमा वाज सातमा ॥ १ ॥**

अन्वयः—तोशा 'तोशौ' वृत्रहणा सजित्वाना अपराजिता वाजसातमा इन्द्राग्नी हुवे ॥

पदार्थः—(तोशा 'तोशौ') दोषनाशक[1] (वृत्रहणा) पापहन्ता[2] (सजित्वाना) समान प्रभावक (अपराजिता) पराजित न होने वाला—सदा विजयी (वाजसातमा) अमृत अन्नभोग देने वाला[3] (इन्द्राग्नी) ऐश्वर्यवान् एवं ज्ञानप्रकाशस्वरूप परमात्मा को (हुवे) प्रार्थित करता हूँ—प्रार्थना में लाता हूँ ॥ १ ॥

१७०३. **प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे ॥ २ ॥**

पदपाठः— **प्रवामर्च्चन्त्युक्थिनः ॥ २ ॥**

(देखो अर्थव्याख्या मन्त्र संख्या १५७५)

१७०४. **इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमकेन कर्मणा ॥ ३ ॥**

पदपाठः— **इन्द्राग्नीनवतिम्पुरः ॥ ३ ॥**

(देखो अर्थव्याख्या मन्त्र संख्या १५७६)

तृतीय तृच

ऋषिः—भारद्वाजः (परमात्मा के अर्चनबल को धारण करने वाला उपासक)॥
देवता—अग्निः (ज्ञानप्रकाशस्वरूप परमात्मा)॥ छन्दः—गायत्री ॥

१७०५. **उप त्वा रणवसन्दृशं प्रयस्वन्तः सहस्कृत। अग्ने ससृज्महे गिरः ॥ १ ॥**

पदपाठः— **उप त्वा रणवसंदृशम् रणव संदृशम् प्रयस्वन्तः सहस्कृत सहः कृत अग्ने ससृज्महे गिरः ॥ १ ॥**

अन्वयः—सहस्कृत-अग्ने प्रयस्वन्तः त्वा रणवसन्दृशम् गिरः-उपससृज्महे ॥

पदार्थः—(सहस्कृत-अग्ने) हे अध्यात्मबल से साक्षात् करने योग्य

१. "नितोशते वधकर्मा" [निघं० २.१९]।
२. "पाप्मा वै वृत्रः" [श० ११.१.५.७]।
३. "अमृतोऽन्नं वै वाजः" [जै० २.१९३]।

ज्ञानप्रकाशस्वरूप परमात्मन्! (प्रयस्वन्तः) योगाभ्यासरूप प्रयत्नवान् हम उपासक[1] (त्वा रण्वसन्दृशम्) तुझ रमणीय स्वरूप को[2] (गिरः-उपससृज्महे) स्तुतियों[3] को उपसृष्टि करते हैं—उपहार देते हैं—समर्पित करते हैं ॥ १ ॥

१७०६. उप च्छायामिव घृणेरगन्म शर्म ते वयम्। अग्ने हिरण्यसन्दृशः ॥ २ ॥

पदपाठः— उप छायाम् इव घृणेः अगन्म शर्म ते वयम् अग्ने हिरण्यसंदृशः हिरण्य संदृशः ॥ २ ॥

अन्वयः—अग्ने ते घृणेः-हिरण्यसन्दृशः शर्म छायाम्-इव वयम्-उप-अगन्म ॥

पदार्थः—(अग्ने) हे परमात्मन्! (ते घृणेः-हिरण्यसंदृशः) तुझ जाज्वल्यमान—दीप्त[4] अमृतस्वरूप[5] के (शर्म छायाम्-इव वयम्-उप-अगन्म) वृक्ष छाया समान घर[6]—आश्रय को हम उपाश्रित करें पास प्राप्त करें ॥ २ ॥

१७०७. य उग्रइव शर्यहा तिग्मशृङ्गो न वंसगः। अग्ने पुरो रुरोजिथ ॥ ३ ॥

पदपाठः— यः उग्रः इव शर्यहा शर्य हा तिग्मशृङ्गः तिग्म शृङ्गः न वꣳसगः अग्ने पुरः रुरोजिथ ॥ ३ ॥

अन्वयः—यः शर्यहा-उग्रः-इव वंसगः-तिग्मशृङ्गः-न अग्ने पुरः-रूरोजिथ ॥

पदार्थः—(यः) जो परमात्मा (शर्यहा-उग्रः-इव) शर्य—इषु—वाण[7] से हनन करने वाले शस्त्रधारी उग्र—बलवान् के समान प्रहारकर्ता (वंसगः-तिग्मशृङ्गः-न) कमनीय—यथेष्टमार्ग को जाने वाला[8] तीक्ष्ण सींगों वाले साण्ड के समान आगे आने वाले के अङ्ग-भङ्ग करता हुआ (अग्ने) परमात्मन्! तू (पुरः-रूरोजिथ) हमारे मनो को[9] निरुद्ध कर ॥ ३ ॥

---

१. "यसु प्रयत्ने" [दिवादि०] प्रपूर्वात् क्वपि रूपम्।
२. 'रण रमणे' "रणाय चक्षसे....रमणीयाय चक्षसे" [निरु० ९.२६]।
३. "स्तुतयो गिरो गृणातेः" [निरु० १.१०]।
४. "घृणिः-ज्वलतो नाम" [निघं० १.१७]।
५. "अमृतं वै हिरण्यम्" [तै० ५.२.७.२]।
६. "शर्म गृहनाम" [निघं० ३.४]।
७. "शर्या इषवः शरमय्यः" [निरु० ५.४]।
८. "वनोति कान्तिकर्मा" [निघं० २.६] ततो बाहुलकात् सः प्रत्ययः [उणा० ३.६२]।
९. "मन एव पुरः" [श० १०.२.६.५१]।

चतुर्थ तृच

ऋषिः—भरद्वाजः (परमात्मा के अर्चनबल को अपने अन्दर धारण करने वाला उपासक)॥ देवता—वैश्वानरोऽग्निः (विश्वनायक परमात्मा)॥ छन्दः—गायत्री॥

१७०८. ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे॥ १ ॥

पदपाठः— ऋतावानम् वैश्वानरम् वैश्व नरम् ऋतस्य ज्योतिषः पतिम् अजस्रम् अ जस्रम् घर्मम् ईमहे॥ १ ॥

अन्वयः—ऋतावानम् ऋतस्य ज्योतिषः-पतिम् अजस्रं घर्मम्-ईमहे॥

पदार्थः—(ऋतावानम्) अमृत वाले मोक्षानन्द देने वाले[1]—(ऋतस्य ज्योतिषः-पतिम्) अमृतज्ञान ज्योति के स्वामी (अजस्रं घर्मम्-ईमहे) आलस्य अनश्वर तेजोरूप[2] अमृतानन्द परमात्मा को माँगते हैं॥ १ ॥

१७०९. य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन्। ऋतूनुत्सृजते वशी॥ २ ॥

पदपाठः— यः इदम् प्रतिपप्रथे प्रति पप्रथे यज्ञस्य स्वः उत्तिरन् उत् तिरन् ऋतून् उत सृजते वशी॥ २ ॥

अन्वयः—यज्ञस्य स्वः-उत्तिरन् यः इदं प्रतिपप्रथे वशी ऋतून्-उत्सृजते॥

पदार्थः—(यज्ञस्य स्वः-उत्तिरन्) उपासकों के अध्यात्मयज्ञ के सुखफल को देने के हेतु (यः) जो विश्वनायक परमात्मा (इदं प्रतिपप्रथे) इस जगत् को पुनः पुनः प्रथित करता है—मनुष्यों के कर्म करणार्थ (वशी ऋतून्-उत्सृजते) वह वशकर्ता परमात्मा जगत् में ऋतुओं को उत्सर्जित करता है—उत्पन्न करता है पुनः मोक्ष की ओर भी ले जाता है॥ २ ॥

१७१०. अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको विराजति॥ ३ ॥

पदपाठः— अग्निः प्रियेषु धामसु कामः भूतस्य भव्यस्य संम्राट् सम् राट् एकः वि राजति॥ ३ ॥

अन्वयः—प्रियेषु धामसु भूतस्य भव्यस्य कामः 'कामस्य' एकः सम्राट्-

---

१. ''ऋतममृतमित्याह'' [जै० २.१५०]।

२. ''तेजो घर्मः'' [मै० २.२.८]।

अग्नि:-विराजति ॥

पदार्थ:—(प्रियेषु धामसु) प्रिय मन नेत्र आदि अङ्गों में[1] (भूतस्य भव्यस्य काम: 'कामस्य') हुए और आगे होने वाले काम—इच्छाभाव[2] का (एक: सम्राट्-अग्नि:-विराजति) अकेला सम्राट् परमात्मा विराजमान है ॥ ३ ॥

इति अष्टादशोऽध्याय: ॥ १८ ॥

---

१. "ईमहे याञ्चाकर्मा" [निघं० ३.१९]।

२. "अङ्गानि वै धामानि" [श० ४.३.४.१]

अथ एकोनविंश अध्याय

प्रथम खण्ड

प्रथम तृच

ऋषिः—आङ्गिरसो विरूपः (अङ्गों के प्रेरण नियन्त्रण में कुशल विशेषरूप में परमात्मा को निरूपित करने वाला)॥ देवता—अग्निः (अग्रणायक परमात्मा)॥ छन्दः—गायत्री ॥

१७११. अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वां ३ स्वाम्। कविर्विप्रेण वावृधे॥ १ ॥

पदपाठः— अग्निः प्रत्नेन जन्मना शुम्भानः तन्वम् स्वाम् कविर्विप्रेणवावृधे॥ १ ॥

अन्वयः—कविः-अग्निः प्रत्नेन जन्मना स्वां तन्वं शुम्भानः विप्रेण वावृधे॥

पदार्थः—(कविः-अग्निः) सर्वज्ञ अग्रणायक परमात्मा (प्रत्नेन जन्मना) पुरातनशाश्वतिक—स्वाभाविक अभौतिक प्रादुर्भाव से या पुरातन स्वाभाविक कर्म से[1] या दिव—मोक्षधाम वाले[2] अमृतस्वरूप से (स्वां तन्वं शुम्भानः) अपनी तनुरूप उपासक आत्मा को[3] शोभित करने वाला (विप्रेण वावृधे) मेधावी उपासक द्वारा स्तुत हुआ—स्तुति में लाया हुआ बढ़ता है—महत्त्व को प्राप्त होता है—उपासक के अन्दर साक्षात् होता है॥ १ ॥

१७१२. ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम्। अस्मिन् यज्ञे स्वध्वरे॥ २ ॥

पदपाठः— ऊर्जोंनपातमाहुवे अग्निम् पावकशोचिषम् पावक शोचिषम् अस्मिन् यज्ञे स्वध्वरे सु अध्वरे॥ २ ॥

अन्वयः—अस्मिन् स्वध्वरे यज्ञं ऊर्जः-नपातम् पावक-शोचिषम् अग्निम् आहुवे॥

---

१. ''जन्मसु कर्मसु'' [निरु० ११.२३]।

२. ''असौ वै द्युलोकः प्रत्नम्'' [मै० १.२.५], ''त्रिपादस्यामृतं दिवि'' [ऋ० १०.९०.३]।

३. ''वृणुते तनूं स्वाम्'' [कठो० २.२३, मुण्ड० ३.२.३], ''य आत्मनि तिष्ठन्-यस्यात्मा शरीरम्'' [श० १४.७.६.३०], ''आत्मा वै तनूः'' [श० ६.७.२.६]।

पदार्थः—(अस्मिन् स्वध्वरे यज्ञं) इस शोभन प्राणप्रद[1] अध्यात्मयज्ञ में (ऊर्जः-नपातम्) अध्यात्मरस[2] के न गिराने वाले (पावक-शोचिषम्) पवित्रकारक दीप्ति वाले (अग्निम्) अग्रणायक परमात्मा को (आहुवे) आमन्त्रित करता हूँ॥ २॥

१७१३. स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा। देवैरा सत्सि बर्हिषि॥ ३॥

पदपाठः— सः नः मित्रमहः मित्र महः त्वम् अग्ने शुक्रेण शोचिषा देवैः आ सत्सि बर्हिषि॥ ३॥

अन्वयः—सः-त्वम् मित्रमहः-अग्ने शुक्रेण शोचिषा देवैः बर्हिषि आ सत्सि॥

पदार्थः—(सः-त्वम्) वह तू (मित्रमहः-अग्ने) स्नेह करने वाले उपासकों के प्रशंसनीय स्तुतियोग्य अग्रणायक परमात्मन्! (शुक्रेण शोचिषा) निर्मल दीप्ति से[3] (देवैः) अपने दिव्यगुणों के साथ (बर्हिषि) हृदयाकाश में (आ सत्सि) आ बैठ॥ ३॥

द्वितीय चतुर्ऋच

ऋषिः—अवत्सारः (रक्षा करते हुए का अनुसरणकर्ता उपासक)॥
देवता—सोमः (शान्तस्वरूप परमात्मा)॥ छन्दः—गायत्री॥

१७१४. उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः॥ १॥

पदपाठः— उत् ते शुष्मासः अस्थुः रक्षः भिन्दन्तः अद्रिवः अ द्रिवः नुदस्व याः परिस्पृधः परि स्पृधः॥ १॥

अन्वयः—अद्रिवः ते शुष्मासः रक्षः-भिन्दन्तः उद्-अस्थुः याः-स्पृधः परि नुदस्व॥

पदार्थः—(अद्रिवः) हे स्तुतिकर्त्ताओं वाले[4] (ते शुष्मासः) तेरे बल वेगशक्ति—प्रवाह (रक्षः-भिन्दन्तः) अपने को जिससे रक्षित रखना बचाना ऐसे काम आदि दोष को विदीर्ण करने के हेतु (उद्-अस्थुः) उठ रहे हैं (याः-स्पृधः) जो हमारी स्पर्द्धा करने वाली विरोधी प्रवृत्तियाँ हैं उन्हें (परि नुदस्व) परे निकाल दे॥ १॥

१७१५. अया निजघ्निरोजसा रथसङ्गे धने हिते। स्तवा अबिभ्युषा हृदा॥ २॥

---

१. ''प्राणोऽध्वरः'' [श० ७.२.१.५]। २. ''ऊर्ग्वै रसः'' [श० ५.१.२.८]।
३. ''शोचिः-ज्वलतो नाम'' [निघं० १.१०]।
४. ''अद्रिरसि श्लोककृत्'' [काठ० १.५]।

पदपाठः— **अया निजघ्निः निज घ्निः ओजसा रथसङ्गे रथ सङ्गे धने हिते स्तवै अबिभ्युषा अ बिभ्युषा हृदा ॥ २ ॥**

अन्वयः—अया-ओजसा निजघ्निः रथसङ्गे धने हिते अबिभ्युषा हृदा स्तवै ॥

पदार्थः—(अया-ओजसा) इस स्वात्मबल से—इसके आधार पर (निजघ्निः) पापों का हननकर्त्ता है[1] (रथसङ्गे धने हिते) मेरे साथ रमणीय सङ्ग में अन्तर्हित—अन्दर रखे अध्यात्म धन—मोक्षैश्वर्य के निमित्त (अबिभ्युषा हृदा स्तवै) भयरहित—सङ्कोचरहित हृदय से—मन से तेरी स्तुति करता हूँ ॥ २ ॥

१७१६. **अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ॥ ३ ॥**

पदपाठः— **अस्य व्रतानि न आधृषे आ धृषे पवमानस्य दूढ्या रुज यः त्वा पृतन्यति ॥ ३ ॥**

अन्वयः—अस्य पवमानस्य व्रतानि दूढ्या न-आधृषे यः-त्वा पृतन्यति रुजः ॥

पदार्थः—(अस्य पवमानस्य) इस धारारूप में प्राप्त होने वाले परमात्मा के (व्रतानि) कर्मों[2] नियमों को (दूढ्या) दुष्टबुद्धि—अन्यथा विचार से (न-आधृषे) कोई भी नहीं दबा सकता है (यः-त्वा पृतन्यति) जो तुझे—तेरे साथ संग्राम चाहता है परमात्मन्! तू उसे (रुजः) भग्न कर देता है ॥ ३ ॥

१७१७. **तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ॥ ४ ॥**

पदपाठः— **तम् हिन्वन्ति मदच्युतम् मद च्युतम् हरिम् नदीषु वाजिनम् इन्दुम् इन्द्राय मत्सरम् ॥ ४ ॥**

अन्वयः—तम् मदच्युतम् हरिम् वाजिनम् मत्सरम् इन्दुम् इन्द्राय नदीषु हिन्वन्ति ॥

पदार्थः—(तम्) उस—(मदच्युतम्) हर्ष बहाने वाले (हरिम्) दुःखहर्ता—(वाजिनम्) बलवान्—(मत्सरम्) आनन्दस्वरूप—(इन्दुम्) दीप्त परमात्मा को (इन्द्राय) उपासक आत्मा के लिये (नदीषु हिन्वन्ति) स्तुतिधाराओं में[4] उपासकजन प्राप्त करते हैं[5] ॥ ४ ॥

---

१. "आदृगमहनजनः किकिनौ लिट् च" [अष्टा० ३.२.१७१] किः प्रत्ययः।

२. "व्रतं कर्मनाम" [निघं० २.१]।

३. "धीः प्रज्ञानाम" [निघं० ३.९]।

४. "नदः-नदतेः स्तुतिकर्मणः" [निरु० ५.२], "नदति अर्चतिकर्मा" [निघं० ३.१४]।

५. "हिन्वन्ति....आप्नुवन्ति" [निरु० १.२०]।

तृतीय तृच

ऋषिः—विश्वामित्रः (सब का मित्र और सब जिसके मित्र हों ऐसा उपासक)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—त्रिष्टुप्॥

१७१८. **आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। मा त्वा केचिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि॥ १॥**

पदपाठः— **आमन्द्रैरिन्द्रहरिभिः॥ १॥**

(देखो अर्थव्याख्या मन्त्र संख्या २४६)

१७१९. **वृत्रखादो वलं रुजः पुरां दर्मो अपामजः। स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः॥ २॥**

पदपाठः— **वृत्रखादो वृत्र खादः वलम्ँरुजः बलम् रुजः पुराम् दर्मः अपाम् अजः स्थाता रथस्य हर्योः अभिस्वरे अभि स्वरे इन्द्रः दृढा चित् आरुजः आ रुजः॥ २॥**

अन्वयः—इन्द्रः वृत्रखादः वलं रुजः पुरां दर्मः अपाम्-अजः रथस्य स्थाता हर्योः-अभिस्वरः दृढाचित्-आरुजः॥

पदार्थः—(इन्द्रः) ऐश्वर्यवान् परमात्मा (वृत्रखादः) पाप का भक्षकनाशक[1] (वलं रुजः) वरण—वारक—अज्ञान भञ्जक[2] (पुरां दर्मः) मन का विदीर्णकर्ता—मनोवृत्तिहर्त्ता[3] (अपाम्-अजः) कामनाओं[4] वासनाओं को निकाल फेंकने वाला (रथस्य स्थाता) रमणीय[5] मोक्षानन्द का स्थापक—प्राप्त कराने वाला (हर्योः-अभिस्वरः) ऋक् और साम[6]—स्तुति और उपासना के अर्चन—सेवन में[7] (दृढाचित्-आरुजः) दृढ़ दुर्वृत्तियों का भी अस्तव्यस्त करने वाला है॥ २॥

१७२०. **गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गाइव। प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्याइवाशत॥ ३॥**

---

१. "पाप्मा वै वृत्रः" [श० ११.१.५.७]।
२. "वलं वृणोतेः" [निरु० ६.२]।
३. "मन एव पुरः" [श० १०.३.५.७]।
४. "आपो वै सर्वे कामाः" [श० १०.५.४.१५]।
५. "रथो......रममाणोऽस्मिन् तिष्ठतीति" [निरु० ९.११]।
६. "ऋक्सामे वा इन्द्रस्य हरी" [ऐ० २.२४]।
७. "स्वरति अर्चतिकर्मा" [निघं० ३.१४]।

पदपाठः— गम्भीरान् उदधीन् उत धीन् इव क्रतुम् पुष्यसि गाः इव प्र सुगोपाः सु गोपाः यवसम् धेनवः यथा ह्रदम् कुल्याः इव आशत ॥ ३ ॥

अन्वयः—गम्भीरान्-उदधीन्-इव गाः-इव सुगोपाः क्रतुं पुष्यसि धेनवः-यथा यवसम् कुल्याः-इव ह्रदम्-आशत ॥

पदार्थः—(गम्भीरान्-उदधीन्-इव) हे परमात्मन्! तू गहरी जलधाराओं को जैसे, तथा (गाः-इव) गौओं को जैसे (सुगोपाः) अच्छा रक्षक राजा रक्षित करता है उनकी रक्षा करता है ऐसे तू (क्रतुं पुष्यसि) प्रज्ञावान्[1] उपासक को पुष्ट करता है (धेनवः-यथा यवसम्) गौएँ जैसे घास को (कुल्याः-इव ह्रदम्-आशत) नहरें जैसे महान् जलाशय—नद को प्राप्त होती हैं ऐसे तुझे उपासक प्राप्त होते हैं[2] ॥ ३ ॥

चतुर्थ द्व्यृच

ऋषिः—देवातिथिः (इष्टदेव परमात्मा में अतनगमन-प्रवेश करने वाला उपासक)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—विषमा बृहती ॥

१७२१. यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम्। आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ १ ॥

पदपाठः— यथागौरोअपाकृतम् ॥ १ ॥

(देखो अर्थव्याख्या मन्त्र संख्या २५२)

१७२२. मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते। आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥ २ ॥

पदपाठः— मन्दन्तु त्वा मघवन् इन्द्र इन्दवः राधोदेयाय राधः देयाय सुन्वते आमुष्य आ मुष्य सोमम् अपिबः चमूइति सुतम् ज्येष्ठम् तत् दधिषे सहः ॥ २ ॥

अन्वयः—मघवन्-इन्द्र त्वा इन्दवः-मदन्तु राधः-देयाय सुन्वते आमुष्य सोमम्-अपिबः चमू सुतम् तत्-ज्येष्ठे सहः-दधिषे ॥

पदार्थः—(मघवन्-इन्द्र) हे अध्यात्मयज्ञ के आधार परमात्मन्! (त्वा) तुझे (इन्दवः-मदन्तु) आर्द्रभावनापूर्ण उपासनारस हर्षित करे (राधः-देयाय सुन्वते) राधनीय—साधनीय मोक्ष देय दातव्य जिससे है अतः उपासनारस निष्पादन करते

---

१. "कतुः प्रज्ञानाम" [निघं० ३.९]।

२. उपमेयलुप्तालङ्कारः।

हुए उपासक के लिये (आमुष्य सोमम्-अपिबः) सामने आ—साक्षात् होकर[१] उपासनारस को पान कर—स्वीकार कर—करता है पर निश्चय है, और (चमू सुतम्) चमनी—आचमनी[२] वाक्—वाणी के अन्दर निष्पन्न किया है उसे स्वीकार कर (तत्-ज्येष्ठे सहः-दधिषे) मुझ उपासक के अन्दर उस अपने श्रेष्ठ साहस को[३] धारण कराता है ॥ २ ॥

पञ्च द्वयृच

ऋषिः—गोतमः (परमात्मा के अन्दर अत्यन्त गतिशील)॥ देवता—इन्द्रः (ऐश्वर्यवान् परमात्मा)॥ छन्दः—विषमा बृहती ॥

१७२३. **त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्। न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १ ॥**

पदपाठः— **त्वमङ्गप्रशꣳसिषः ॥ १ ॥**
(देखो अर्थव्याख्या मन्त्र संख्या २४७)

१७२४. **मा ते राधांसि मा त ऊतयो वसोऽस्मान् कदा चना दभन्। विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ २ ॥**

पदपाठः— **मा ते राधाꣳसि मा ते ऊतयः वसो अस्मान् कदा च न दभन् विश्वा च नः उपमिमीहि उप मिमीहि मानुष वसूनि चर्षणिभ्यः आ ॥ २ ॥**

अन्वयः—वसो ते राधांसि अस्मान् कदाचन मा दभन् ते-ऊतयः मानुष च नः-चर्षणिभ्यः विश्वा वसूनि आ-उपमिमीहि ॥

पदार्थः—(वसो) हे वसाने वाले परमात्मन्! (ते राधांसि) तेरे ज्ञान आदि धन (अस्मान् कदाचन) हमें कभी भी (मा दभन्) नहीं दबाते—नहीं सताते (ते-ऊतयः) तेरी रक्षाएँ हमें कभी नहीं दबाती—सताती हैं अन्य जन को सता सकती हैं (मानुष) हे हम मननशील उपासकों के हितकर परमात्मन्! (च) और (नः-चर्षणिभ्यः) हम दर्शनेच्छुकों के (विश्वा वसूनि) सब वसाने वाले निर्वाहक धनों को भी (आ-उपमिमीहि) समन्तरूप में उपस्थापित कर ॥ २ ॥

---

१. ''आमुष्य उपसर्गबलाद्धातोरर्थविकरणं 'विशिष्टत्वकरणं' भवति'' [निरु० १.३]।
२. ''कृषिचमितरतिधविसनिखनिभ्यः-ऊः स्त्रिमाम्'' [उणा० १.८०]।
३. ''सहोऽसि सहो मयि धेहि'' [यजु० १९.९]।

द्वितीय खण्ड

प्रथम तृच

ऋषिः—वामदेवः (वननीय परमात्मदेव वाला उपासक)॥ देवता—उषाः[1](परमात्मरूप दीप्ति या परमात्मा की ज्योति)॥ छन्दः—गायत्री॥

१७२५. प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः। दिवो अदर्शि दुहिता॥ १॥

पदपाठः— प्रति स्या सूनरी सु नरी जनी व्युच्छन्ती वि उच्छन्ती परि स्वसुः दिवः अदर्शि दुहिता॥ १॥

अन्वयः—स्या सूनरी जनी स्वसुः परि व्युच्छन्ती दिवः-दुहिता प्रति-अदर्शि॥

पदार्थः—(स्या) वह परमात्मरूप दीप्ति या परमात्मज्योति (सूनरी) उपासकों की सुनेतृत्व करने वाली (जनी) उत्तम जीवन देने वाली (स्वसुः परि) सम्यक् अज्ञान को फेंकने वाली[2] मानवीय ज्ञान से ऊपर (व्युच्छन्ती) अन्दर प्रकाशित होती हुई (दिवः-दुहिता प्रति-अदर्शि) मोक्षधाम की दोहने वाली उपासक के अन्दर प्रत्यक्ष होती हैं॥ १॥

१७२६. अश्वेव चित्रारुषी माता गवामृतावरी। सखा भूदश्विनोरुषाः॥ २॥

पदपाठः— अस्वा इव चित्रा अरुषी माता गवाम् ऋतावरी सखा स खा भूत् अश्विनोः उषाः॥ २॥

अन्वयः—उषाः अश्वा-इव चित्रा अरुषी गवां माता ऋतावरी अश्विनोः-सखाः-अभूत्॥

पदार्थः—(उषाः) परमात्मरूप दीप्ति या परमात्मज्योति (अश्वा-इव) व्यापनशील[3] (चित्रा) चायनीया दर्शनीया (अरुषी) आरोचमान[4] (गवां माता) स्तोताओं[5] का मान करने वाली (ऋतावरी) अमृत वाली[6] (अश्विनोः-सखाः-अभूत्) श्रोत्रों—कानों[7] की सखा—समान ख्यान धर्म वाली है कान सुनते हैं वह भी उपासक की स्तुति सुनती है॥ २॥

---

१. "अत्र स्त्रीलिङ्गे परमात्मरूपादीप्तिर्लक्ष्यते यथाऽन्यत्र वागम्भृणी पारमेश्वरी" [ऋ० १०.१२५]।

२. "स्वसा-सु-असा" [निरु० ११.३३]।

३. "इवोऽपि दृश्यते पदपूरणः" [निरु० १.१०]।

४. "अरुषीरारोचनाः" [निरु० २.१६]।

५. "गौः स्तोतृनाम" [निघं० २.१६]।

६. "ऋतममृतमित्याह" [जै० १६०]।

७. "श्रोत्रे अश्विनौ" [श० १.९.१.१३]।

१७२७. उत सखास्यश्विनोरुत माता गवामसि। उतोषो वस्व ईशिषे॥ ३॥

पदपाठः— उत सखा स खा असि अश्विनोः उत माता गवाम् असि उत उषः वस्वः ईशिषे॥ ३॥

अन्वयः—उत-अश्विनोः सखा-असि उत गवां माता उत उषः वस्वः-ईशिषे॥

पदार्थः—(उत-अश्विनोः सखा-असि) हाँ तू कानों की सखा—समान ख्यान—समान धर्म वाली है (उत गवां माता) और स्तुतिकर्ताओं का मान करने वाली है (उत) और (उषः) तू परमात्मरूप दीप्ति या परमात्मज्योति (वस्वः-ईशिषे) जगत् की वस्तुमात्र का[1] स्वामित्व करती है॥ ३॥

द्वितीय तृच

ऋषिः—प्रस्कण्वः (मेधावी का पुत्र[2] प्रकृष्ट मेधावी उपासक)॥ देवता—अश्विनौ देवते (ज्ञानप्रकाशस्वरूप एवं आनन्दरसरूप दोनों धर्म वाला परमात्मा)॥ छन्दः—गायत्री॥

१७२८. एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत्॥ १॥

पदपाठः— एषोउषाअपूर्व्या॥ १॥

अन्वयः—एषा-उ-उषाः अपूर्व्या प्रिया दिवः-व्युच्छति अश्विना वां बृहत् स्तुषे॥

पदार्थः—(एषा-उ-उषाः) अहो यह उषा—परमात्मरूप दीप्ति या परमात्मज्योति (अपूर्व्या प्रिया) सर्वश्रेष्ठ समाधि प्रज्ञा में साक्षात् होने वाली तृप्तिकारी (दिवः-व्युच्छति) मोक्षधाम से[3] उपासक के अन्दर प्रकाशित हो रही है (अश्विना वां बृहत् स्तुषे) हे ज्ञानज्योतिस्वरूप और आनन्दरसरूप परमात्मन्! तुझे—तेरी बड़ी स्तुति करता हूँ॥ १॥

१७२९. या दस्रा सिन्धुमातरा मनोतरा रयीणाम्। धिया देवा वसुविदा॥ २॥

पदपाठः— या दस्रा सिन्धुमातरा सिन्धु मातरा मनोतरा रयीणाम् धिया देवा वसुविदा वसु विदा॥ २॥

---

१. "यद्वै किञ्च विन्दते तद् वसु" [काठ० १०.६]।

२. "प्रस्कण्वः कण्वस्य पुत्रः" [निरु० ३.१७]।

३. "त्रिपादस्यामृतं दिवि" [ऋ० १०.९०.३]।

अन्वयः—या दस्रा सिन्धुमातरा रयीणां मनोहरा धिया वसुविदा देवा॥

पदार्थः—(या दस्रा) जो दर्शनीय[1] (सिन्धुमातरा) स्यन्दमान उपासनारस का मान कराने वाले जिसके हैं ऐसा दोनों धर्मों युक्त (रयीणां मनोहरा) धनों के मन को धन संग्रह के मनो विचार को हराने हटाने वाला (धिया वसुविदा) ध्यान धारणा से वसाने योग्य वस्तु को प्राप्त कराने वाला (देवा) इष्टदेव उपास्य ज्योतिस्वरूप आनन्दरसरूप परमात्मा है॥ २॥

१७३०. **वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि। यद्वां रथो विभिष्पतात्॥ ३॥**

पदपाठः— **वच्यन्ते वाम् ककुहासः जूर्णायाम् अधि विष्टपि यत् वाम् रथः विभिः पतात्॥ ३॥**

अन्वयः—ककुहासः जूर्णायाम् अधिविष्टपि वां वच्यन्ते यत्–वाम्–रथः विभिः–पतात्॥

पदार्थः—(ककुहासः) महान् आत्मा जीवन्मुक्त[2] (जूर्णायाम्) जीर्ण तनु अन्तिम देह समाप्त हो जाने पर (अधिविष्टपि) मोक्षधाम में[3] (वां वच्यन्ते) तुझ परमात्मा को प्राप्त होते हैं[4] (यत्–वाम्–रथः) जो तेरा रमणस्थान मोक्ष (विभिः–पतात्) उपासकों द्वारा प्राप्त किया जाता है[5]॥ ३॥

तृतीय तृच

ऋषिः—गोमतः (परमात्मा में अत्यन्त गति करने वाला उपासक)॥ देवता—उषाः (परमात्मदीप्ति या परमात्मज्योति)॥ छन्दः—उष्णिक्॥

१७३१. **उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे॥ १॥**

पदपाठः— **उषः तत् चित्रम् आ भर अस्मभ्यम् वाजिनीवति येन तोकम् च तनयम् च धामहे॥ १॥**

अन्वयः—वाजिनीवति–उषः अस्मभ्यम् तत्–चित्रम्–आभर येन तोकं तनयं

---

१. ''दस दर्शने'' [चुरादि०], ततो रक् [उणा० २.१३]।
२. ''ककुहो महन्नाम'' [निघं० ३.३]।
३. ''तदेव ब्रध्नस्य विष्टपं तस्मिन्नेतद् देवाः सर्वान् कामान् दुहे'' [जै० ३.३३९], ''यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम्। तत्र माममृतं कृधि'' [ऋ० ९.११३.१०]।
४. ''वञ्चु गत्यर्थः'' [भ्वादि०] कर्तरि कर्मप्रत्ययश्छान्दसः।
५. ''कर्मणि कर्तृप्रत्ययश्छान्दसः।''

च धामहे ॥

पदार्थः—(वाजिनीवति-उषः) हे अमृत अन्न वाली परमात्मदीप्ति! या परमात्मज्योति! तू (अस्मभ्यम्) हमारे लिये (तत्-चित्रम्-आभर) उस चायनीय दर्शनीय अमृत अन्नभोग को आभरित कर (येन) जिससे (तोकं तनयं च धामहे) तोदने व्यथित करने वाले मन को[1] और इन्द्रियगण को[2] तेरे अन्दर धरते समर्पित करते हैं ॥ १ ॥

१७३२. उषो अद्येह गोमत्यश्वावति विभावरि। रेवदस्मे व्युच्छ सूनृतावति ॥ २ ॥

पदपाठः— उषः अद्य अ द्य इह गोमति अश्वावति विभावरि वि भावरि रेवत् अस्मेइति वि उच्छ सूनृतावति सु नृतावति ॥ २ ॥

अन्वयः—उषः अद्य इह गोमति अश्वावति विभावरि सुनृतावति अस्मे रेवत्-व्युच्छ ॥

पदार्थः—(उषः) हे परमात्मस्वरूप दीप्ति! या परमात्मज्योति! तू (अद्य) आज—अब (इह) इस जीवन में (गोमति) वाक्—विद्या वाली—ज्ञान देने के लिये (अश्वावति) व्यापनशील मन वाली—मननशक्ति देने के लिये (विभावरि) विशेष मति वाली—विशिष्ट बुद्धि या सूझ देने के लिये (सुनृतावति) उत्तम वाणी वाली सुसंयत सत्यवाणी देने के लिये (अस्मे) हमारे लिये[3] (रेवत्-व्युच्छ) वीर्य[4] आत्मबलयुक्त प्रकट हो—साक्षात् हो ॥ २ ॥

१७३३. युङ्क्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः। अथा नो विश्वा सौभगान्या वह ॥ ३ ॥

पदपाठः— युंक्ष्व हि वाजिनीवति अश्वान् अद्य अ द्य अरुणान् उषः अथ नः विश्वा सौभगानि सौ भगानि आ वह ॥ ३ ॥

अन्वयः—वाजिनीवति-उषः अरुणान्-अश्वान् युङ्क्ष्वहि अथ नः विश्वा सौभगानि आवह ॥

---

१. ''तोकं तुद्यतेः, तनयं तनोतेः'' [निरु० १०.७]।

२. ''तुद व्यथने'' [तुदादि०], ''तनु श्रद्धोपकरणयोः'' [चुरादि०] उपकरणम्-इन्द्रियम्।

३. ''सुपां सुलुक्पूर्वसवर्णाच्छे.....'' [अष्टा० ७.१.३९] इति शे।

४. ''वीर्यं वै रयिः'' [श० १३.४.२.१३], ''रयेर्मतौ सम्प्रसारणम्'' [अष्टा० ६.१.३४ पर वार्तिक]।

पदार्थः—(वाजिनीवति-उषः) हे अमृत अन्नभोग वाली परमात्मदीप्ति या परमात्मज्योति! तू आज (अरुणान्-अश्वान् युङ्क्ष्वहि) ओरोचन[1] ज्ञान से प्रकाशमान तथा ईश्वर[2] इन्द्रिय संयम में प्रकृष्टयुक्त समर्थ उपासकों को अपने में अवश्य युक्त कर (अथ) अनन्तर (नः) हमारे लिये (विश्वा सौभगानि) सारे सौभाग्यों को (आवह) ले आ—प्राप्त करा॥ ३॥

चतुर्थ तृच

ऋषिः—गोमतः (परमात्मा में अत्यन्त गति करने वाला उपासक)॥
देवता—अश्विनौ (ज्ञानज्योतिस्वरूप और आनन्दरसपूर्ण परमात्मा)॥
छन्दः—उष्णिक्॥

१७३४. अश्विना वर्तिरस्मदा गोमद् दस्त्रा हिरण्यवत्। अर्वाग्रथं समनसा नि यच्छतम्॥ १॥

पदपाठः— अश्विना वर्त्तिः अस्मत् आ गोमत् दस्त्रा हिरण्यवत् अर्वाग्रथꣳसमनसानियच्छतम्॥ १॥

अन्वयः—दस्त्रा-अश्विना अस्मत्-वर्त्तिः गोमत् हिरण्यवत् रथम् अर्वाक् समनसा नियच्छतम्॥

पदार्थः—(दस्त्रा-अश्विना) हे दर्शनीय ज्योतिस्वरूप एवं आनन्दस्वरूप परमात्मन्! (अस्मत्-वर्त्तिः) हमारा[3] अध्यात्ममार्ग[4] (गोमत्) स्तुति वाला[5] (हिरण्यवत्) अमृत वाला[6]—अमृतानन्द वाला हो (रथम्) इस अध्यात्ममार्ग में रथरूप अपने रमणीय स्वरूप को (अर्वाक्) इधर—हमारी ओर (समनसा) समान मन हुआ (नियच्छतम्) नियतकर स्थिर कर॥ १॥

१७३५. एह देवा मयोभुवा दस्त्रा हिरण्यवर्त्तनी। उषर्बुधो वहन्तु सोमपीतये॥ २॥

पदपाठः— आ इह देवा मयोभुवा मयः भुवा दस्त्रा हिरण्यवर्त्तनी हिरण्य वर्त्तनीइति उषर्बुधः उषः बुधः वहन्तु सोमपीतये सोम पीतये॥ २॥

---

१. "अरुष आरोचनः" [निरु० ५.२१]।
२. "ईश्वरो वा अश्वः प्रयुक्तः परा परावतो गन्ता" [तै० ३.८.९.३]।
३. "सुपां सुलुक्....." [अष्टा० ७.१.३२] इति अस्मत् शब्दात् षष्ठीविभक्तेर्लुक्।
४. "वर्तते गतिकर्मा" [निघं० २.१४], "वृतेश्छन्दसि-इन्" [उणा० ४.१४१]।
५. "गौः-वाङ्नाम" [निघं० १.११]।
६. "अमृतं वै हिरण्यम्" [श० ९.४.४.५]।

अन्वयः—मयोभुवा हिरण्यवर्तनी दस्रा देवा इह उषर्बुधः सोमपीतये आवहन्तु ॥

पदार्थः—(मयोभुवा) हे सुखों को भावित करने वाले—(हिरण्यवर्तनी) हृदयरमण मार्ग वाले[1]—(दस्रा) दर्शनीय (देवा) दिव्य गुण वाले—परमात्मन्! (इह) इस अध्यात्ममार्ग में चलने, वर्तमान (उषर्बुधः) तेरी ज्योति को समझने वाले उपासकजन (सोमपीतये) उपासनारस को पान कराने—स्वीकार कराने के लिये (आवहन्तु) तुझे प्राप्त होते हैं ॥ २ ॥

१७३६. यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः । आ न ऊर्जं वहतमश्विना युवम् ॥ ३ ॥

पदपाठः— यौ इत्था श्लोकम् आ दिवः ज्योतिः जनाय चक्रथुः आ नः ऊर्जम् वहतम् अश्विना युवम् ॥ ३ ॥

अन्वयः—यौ इत्था श्लोकं ज्योतिः दिवः युवम् 'युवाम्'-अश्विना जनाय चक्रथुः नः ऊर्जम्–आवहतम् ॥

पदार्थः—(यौ) जो ज्योतिस्वरूप और आनन्दरसरूप परमात्मा (इत्था) सत्य[2]—अविनाशी (श्लोकं ज्योतिः) प्रशंसनीय या ज्ञान ज्योति को[3] (दिवः) मोक्षधाम से (युवम् 'युवाम्'-अश्विना) तू हे ज्योतिस्वरूप और आनन्दरसरूप परमात्मन्! (जनाय चक्रथुः) उपासकजन के लिये प्रकाशित करता है (नः) हमारे लिये (ऊर्जम्–आवहतम्) अध्यात्मरस को प्राप्त करा ॥ ३ ॥

तृतीय खण्ड

प्रथम तृच

ऋषिः—वसुश्रुतः (वसाने वाले परमात्मा का श्रवण किया जिसने ऐसा उपासक)॥ देवता—अग्निः (अग्रणायक परमात्मा)॥ छन्दः—पंक्तिः ॥

१७३७. अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः । अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥ १ ॥

पदपाठः— अग्निन्तम्मन्येयोवसुः ॥ १ ॥

(देखो अर्थव्याख्या मन्त्र संख्या ४२५)

---

१. "हिरण्यं.....हृदयरमणम्" [निरु० २.१०]।

२. "इत्था सत्यनाम" [निघं० ३.१०]।

३. "श्लोकः-वाङ्नाम" [निघं० १.३१]।

१७३८. अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः। अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर॥ २॥

पदपाठः— अग्निः हि वाजिनम् विशे ददाति विश्वचर्षणिः विश्व चर्षणिः अग्निः राये स्वाभुवम् सु आभुवम् सः प्रीतः याति वार्यम् इषꣳस्तोतृभ्यआभर॥ २॥

अन्वयः—विश्वचर्षणिः-अग्निः-हि विशे वाजिनं ददाति सः-अग्निः प्रीतः राये स्वाभुवं याति स्तोतृभ्यः-इषम् आभर॥

पदार्थः—(विश्वचर्षणिः-अग्निः-हि) सर्वद्रष्टा अग्रणायक परमात्मा ही (विशे) उसमें विष्ट-प्रविष्ट उपासक प्रजाजन[1] के लिये (वाजिनं ददाति) आत्मबल को देता है[2] (सः-अग्निः) वह अग्रणायक परमात्मा (प्रीतः) प्रसन्न हुआ (राये स्वाभुवं याति) उसमें रमण करने वाले या रमणीय[3] प्रिय उपासक के लिये अपने सम्यक् प्रकटरूप—साक्षात् स्वरूप को[4] प्राप्त कराता है[5] (स्तोतृभ्यः-इषम् आभर) स्तुतिकर्ताओं के लिये एषणीय सुख को आभरित कर॥ २॥

१७३९. सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः। समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर॥ ३॥

पदपाठः— सः अग्निः यः वसुः गृणे सम् यम् आयन्ति आ यन्ति धेनवः सम् अर्वन्तः रघुद्रुवः रघु द्रुवः सम् सुजातासः सु जातासः सूरयः इषꣳस्तोतृभ्यआभर॥ ३॥

अन्वयः—सः-अग्निः यः-वसुः-गृणे यं धेनवः सम्-आयन्ति रघुद्रुवः-अर्वन्तः सुजातासः सूरयः सम् स्तोतृभ्यः-इषम्-आभर॥

पदार्थः—(सः-अग्निः यः-वसुः-गृणे) वह अग्रणायक परमात्मा जो मोक्षधाम में वसाने वाला उपासकों द्वारा स्तुत किया जाता है (यं धेनवः सम्-आयन्ति) जिसे स्तुतिवाणियाँ[6] सम्यक् प्राप्त करती हैं (रघुद्रुवः-अर्वन्तः) मृदुगति करने वाले एवं

---

१. ''आद्या ही मनः प्रजाविशः'' [श० ४.२.१.१७]।
२. वाजिनशब्दोऽकारान्तो बलार्थः, यथा ''वाजिना वाजिनम्'' [मै० १.१०.१]।
३. ''राये.....'' [ऋ० १.८४.१७] अत्र निरुक्तम् ''राय-रणाय रमणीय'' [निरु० १४.३९]।
४. 'सु-आभुवम्' इति पदपाठः, सु-आभूः-सम्यक् प्रकटभावः, यथा ''इयं विसृष्टिर्यत आबभूव'' [ऋ० १०.१२९.७], ''प्राणं वा अनुप्रजाः पशव आभवन्ति'' [जै० ३०२.२.४]।
५. याति-यापयन्ति अन्तर्गतणिजर्थः।
६. ''धेनुः-वाङ्नाम'' [निघं० १.११]।

प्रेरणा वाले[1] अपने को अर्पित करने वाले (सुजातासः सूरयः सम्) शुद्ध संयत स्तुतिकर्ता[2] सम्यक् प्राप्त करते हैं (स्तोतृभ्यः-इषम्-आभर) उन स्तुतिकर्ताओं के लिये एषणीय सुख को आभरित कर॥ ३ ॥

द्वितीय तृच

ऋषिः—सत्यश्रवाः (सत्यस्वरूप परमात्मा श्रवणीय है जिसका)॥ देवता—उषाः (परमात्मा की दीप्ति या ज्योतिः)॥ छन्दः—गायत्री॥

१७४०. महे नो अद्य बोधयोषो राये दिवित्मती। यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥ १॥

पदपाठः— महेनोअद्यबोधय॥ १॥

(देखो अर्थव्याख्या मन्त्र संख्या ४२१)

१७४१. या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः। सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥ २॥

पदपाठः— या सुनीथे सु नीथे शौचद्रथे शौचत् रथे व्यौच्छः वि औच्छः दुहितः दिवः सा वि उच्छ सहीयसि सत्यश्रवसिवाय्ये सुजातेअश्वसूनृते॥ २॥

अन्वयः—या सुनीथे शौचद्रथे दिवः-दुहितः व्यौच्छ सा सहीमसि व्युच्छ सत्यश्रवसि वाय्ये सुजाते अश्वसुनृते॥

पदार्थः—(या) जो तू परमात्मा की दीप्ति या ज्योति! (सुनीथे) हे अध्यात्ममार्ग में शोभननेत्री—सम्यक् ले जाने वाली[3] (शौचद्रथे) प्रकाशमान रमणीय स्वरूप वाली (दिवः-दुहितः) मोक्षधाम की तत्रस्थ आनन्दरस की दूहने वाली (व्यौच्छः तू मुझ उपासक के अन्दर प्रकाशित हो (सा सहीमसि व्युच्छ) वह तू पापों अज्ञानों को अत्यन्त प्रसहन करने दबाने वाली मेरे अन्दर प्रकाशित हो, तथा (सत्यश्रवसि) हे सत्यस्वरूप परमात्मा का श्रवण कराने वाली (वाय्ये) वरणीय (सुजाते) सुप्रसिद्ध (अश्वसुनृते) व्यापक परमात्मा की वाणी जिसमें हो ऐसी परमात्मदीप्ति या परमात्मज्योति मेरे अन्दर प्रकाशित हो॥ २॥

१७४२. सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः। यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥ ३॥

---

१. "अर्वैरणवान्" [निरु० १०.३१]।

२. "सूरिः स्तोतृनाम" [निरु० ३.१६]।

३. "नी धातोः क्थन् प्रत्ययः" [उणा० २.२]।

पदपाठः— सा नः अद्य अ द्य आभरद्वसुः आभरत् वसुः वि उच्छ दुहितः दिवः या उ व्यौच्छः वि औच्छः सहीयसि सत्यःश्रवसिवाय्येसुजाते अश्वसूनृते ॥ ३ ॥

अन्वयः—सा आभरद्वसुः दिवः-दुहितः अद्य या-उ व्युच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसुनृते ॥

पदार्थः—(सा) वह तू परमात्मा की दीप्ति या ज्योति! (आभरद्वसुः) वसाने वाले परमात्मा को आभरित करती हुई (दिवः-दुहितः) हे मोक्षधाम की दूहने वाली (अद्य) आज—इस जन्म में मुझ उपासक के अन्दर प्रकाशित (या-उ) जो ही तू (व्युच्छः) प्रकाशित हो चुकी पूर्व भी (सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसुनृते) पापों अज्ञानों को प्रसहन करने वाली दबाने वाली सत्यस्वरूप परमात्मा का श्रवण कराने वाली वरणीय सुप्रसिद्ध व्यापक परमात्मा की वाणी जिसमें है ऐसी तू मुझ उपासक के अन्दर प्रकाशित हो ॥ ३ ॥

तृतीय तृच

ऋषिः—अवस्युः (परमात्मप्राप्ति का इच्छुक) ॥ देवता—अश्विनौ (ज्ञानज्योतिःस्वरूप और आनन्दरसरूप परमात्मा) ॥ छन्दः—गायत्री ॥

१७४३. प्रति प्रियतमं रथं वृषणं वसुवाहनम्। स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥ १ ॥

पदपाठः— प्रतिप्रियतमꣳरथम् ॥ १ ॥

(देखो अर्थव्याख्या मन्त्र संख्या ४१८)

१७४४. अत्यायातमश्विना तिरो विश्वा अहं सना। दस्रा हिरण्यवर्त्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥ २ ॥

पदपाठः— अत्यायातम् अति आयातम् अश्विना तिरः विश्वाः अहम् सना दस्रा हिरण्यवर्त्तनी हिरण्य वर्त्तनीइति सुषुम्णा सु सुम्ना सिन्धुवाहसा सिन्धु वाहसा माध्वीममश्रुतꣳहवम् ॥ २ ॥

अन्वयः—अश्विना अहं सना विश्वाः-तिरः आयातम् दस्रा हिरण्यवर्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम हवं श्रुतम् ॥

पदार्थः—(अश्विना) हे ज्योतिस्वरूप एवं आनन्दरसरूप परमात्मन्! (अहं सना विश्वाः-तिरः) मैं उपासक सदा सारी कामनाओं को—वासनाओं चित्तवृत्तियों को तिरष्कृत करता हूँ, अतः तू (आयातम्) समन्तरूप से प्राप्त हो (दस्रा) हे दर्शनीय (हिरण्यवर्तनी) हृदयरमण मार्ग वाले (सुषुम्णा) शोभन सुख वाले—शोभन सुखप्रद (सिन्धुवाहसा) स्यन्दशील—बहते हुए उपासनारसों को प्राप्त करने वाला (माध्वी) जीवन में अध्यात्म मधु लाने वाले परमात्मन्! (मम हवं श्रुतम्) मेरे प्रार्थनावचन सुन ॥ २ ॥

१७४५. **आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम्। रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम्॥ ३ ॥**

पदपाठः— **आ नः रत्नानि बिभ्रतौ अश्विना गच्छतम् युवम् रुद्रा हिरण्यवर्त्तनी हिरण्य वर्त्तनीइति जुषाणा वाजिनीवसू वाजिनी वसूइति माध्वीममश्रुतꣳहवम्॥ ३ ॥**

अन्वयः—अश्विना युवम्-'युवाम्' नः रत्नानि बिभ्रतौ आगच्छतम् रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसु माध्वी मम हवं श्रुतम्॥

पदार्थः—(अश्विना) हे ज्योतिस्वरूप एवं आनन्दरसरूप परमात्मन्! (युवम्-'युवाम्') तू (नः) हम उपासकों के लिये (रत्नानि बिभ्रतौ) रमणीय सुख साधनों को धारण करता हुआ (आगच्छतम्) आ—प्राप्त हो (रुद्रा) हमें बुलाता हुआ[१] (हिरण्यवर्तनी) हितरमण मार्ग वाला (जुषाणा) हम उपासकों को प्रेम करता हुआ (वाजिनीवसु) अमृत अन्न वाला[२] मुक्ति में वसाने वाला (माध्वी मम हवं श्रुतम्) जीवन अध्यात्म मधु लाने वाले परमात्मन्! मेरे प्रार्थना वचन को सुन॥ ३ ॥

चतुर्थ खण्ड

प्रथम तृच

ऋषिः—बुधगविष्ठरावृषी (ज्ञानी और स्तुतिवाणी में स्थिर)॥ देवता—अग्निः (ज्ञानप्रकाशस्वरूप परमात्मा)॥ छन्दः—त्रिष्टुप्॥

१७४६. **अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम्। यह्वाइव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ॥ १ ॥**

---

१. "रुद्रो रौतीति सतः" [निरु० १०.६]।

२. "अमृतोऽन्नं वै वाजः" [जै० २.१९३]।

पदपाठः— **अबोध्यग्निःसमिधाजनानाम्॥ १ ॥**

(देखो अर्थव्याख्या मन्त्र संख्या ७३)

१७४७. **अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्। समिद्धस्य रुशददर्शि पाजो महान् देवस्तमसो निरमोचि॥ २ ॥**

पदपाठः— **अबोधि होता यजथाय देवान् ऊर्ध्वः अग्निः सुमनाः सु मनाः प्रातः अस्थात् समिद्धस्य सम् इद्धस्य रुशत् अदर्शि पाजः महान् देवः तमसः निः अमोचि॥ २ ॥**

अन्वयः—होता-अग्निः यजथाय देवान्-अबोधि सुमनाः प्रातः-ऊर्ध्वः-अस्थात् समिद्धस्य रुशत् पाजः महान् देवः तमः-निरमोचि॥

पदार्थः—(होता-अग्निः) स्वीकारकर्ता ज्ञानप्रकाशस्वरूप परमात्मा (यजथाय देवान्-अबोधि) अध्यात्मयज्ञ करने के लिये मुमुक्षुउपासकों को सावधान करता है (सुमनाः) शोभन मनोभाव जिससे हो ऐसा है (प्रातः-ऊर्ध्वः-अस्थात्) जीवन के मार्ग प्रकृष्ट करते हुए बढ़ते समय में उत्कृष्टरूप में[1] आत्मा में साक्षात् होता है जरावस्था में नहीं (समिद्धस्य रुशत् पाजः) प्रसिद्ध हुए का प्रकाशमान बलस्वरूप[2] साक्षात् होता है (महान् देवः) महान् देव परमात्मा (तमः-निरमोचि) अज्ञानान्धकार से छुड़ा देता है॥ २ ॥

१७४८. **यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः। आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः॥ ३ ॥**

पदपाठः— **यत् ईम् गणस्य रशनाम् अजी गरिति शुचिः अङ्क्ते शुचिभिः गोभिः अग्निः आत् दक्षिणा युज्यते वाजयन्ति उत्तानाम् ऊद्‌र्ध्वः अधयत् जुहूभिः॥ ३ ॥**

अन्वयः—यद्-ईम्-अग्निः गणस्य रशनाम् अजीगः शुचिः शुचिभिः-गोभिः-अङ्क्ते दक्षिणा वाजयन्ती आयुज्यते उत्तानाम् जुहूभिः ऊर्ध्वः-अधयत्॥

पदार्थः—(यद्-ईम्-अग्निः) जब यह ज्ञानप्रकाशस्वरूप परमात्मा (गणस्य रशनाम्) स्तुतिकर्ता की[3] रसीली स्तुति को[4] (अजीगः) प्राप्त करता है तो (शुचिः)

---

१. ''युवैव धर्मशीलः स्यात्'' [महाभारत शान्ति० मो० १७५]।

२. ''पाजः-बलनाम'' [निघं० २.९]।

३. ''गणः, गणा-वाङ्नाम'' [निघं० १.११]।

४. ''ऊर्ग्वै रशना'' [तै० सं० ६.१.४.५]।

प्रकाशमान एवं पवित्र परमात्मा (शुचिभिः-गोभिः-अङ्क्ते) प्रकाशमान वाग्ज्योतियों—ज्ञानधाराओं से युक्त कर देता है, तब (दक्षिणा) उपासक की कामना[१] (वाजयन्ती) अमृतअन्नभोग को चाहती हुई[२] (आयुज्यते) पूरी हो जाती है (उत्तानाम्) उस उत्कृष्ट कामना को (जुहूभिः) स्तुतिवाणियों से[३] (ऊर्ध्वः-अधयत्) ऊपर संरक्षक बन उसे अपना आनन्दरस पिलाता है ॥ ३ ॥

द्वितीय तृच

ऋषिः—कुत्सः (स्तुतियों का कर्ता उपासक[४]) ॥ देवता—उषाः (परमात्मदीप्ति या परमात्मज्योति) ॥ छन्दः—गायत्री ॥

१७४९. इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक् ॥ १ ॥

पदपाठः— इदम् श्रेष्ठम् ज्योतिषाम् ज्योतिः आ अगात् चित्रः प्रकेतः प्र केतः अजनिष्ट विभ्वा वि भ्वा यथा प्रसूता प्र सूता सवितुः सवाय एव रात्री उषसे योनिम् आरैक् ॥ १ ॥

अन्वयः—इदं श्रेष्ठम् ज्योतिषां ज्योतिः-आगात् चित्रः-विभ्वा प्रकेतः यथा प्रसूता सवितुः सवाय रात्रि-उषसे योनिम्-आरैक् ॥

पदार्थः—(इदं श्रेष्ठम्) यह श्रेष्ठ (ज्योतिषां ज्योतिः-आगात्) ज्योतियों की ज्योति मेरे अन्दर आ गई—साक्षात् हो गई (चित्रः-विभ्वा प्रकेतः) चायनीय-दर्शनीय मेरे अन्दर बाहिर व्याप्त चेताने वाला प्रकाश है (यथा प्रसूता सवितुः सवाय) जैसे सविता—उत्पादक परमात्मा के साक्षात् कराने के लिये समाधिप्रज्ञा होती है, सो (रात्रि-उषसे योनिम्-आरैक्) पापवासना[५] दूर होकर परमात्मज्योति के लिये स्थान रिक्त कर देती है ॥ १ ॥

१७५०. रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः। समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ २ ॥

---

१. "कामो वै दक्षिणा" [मै० १.९.४]।
२. "अमृतोऽन्नं वै वाजः" [जै० २.१९३]।
३. "वाग् जुहू" [ऐ० आ० २.१७.२]।
४. "ऋषिः कुत्सो भवति कर्ता स्तोमानाम्" [निरु० ३.१२]।
५. "पाप्मा रात्रिः" [कौ० १७.६]।

पदपाठः— रुशद्वत्सा रुशत् वत्सा रुशती श्वेत्या आ अगात् आरैक् उ कृष्णा सदनानि अस्याः समानबन्धू समान बन्धूइति अमृते अ मृतेइति अनूचीइति द्यावा वर्णम् चरतः आमिनाने आ मिनानेइति ॥ २ ॥

अन्वयः—रुशद्वत्सा रुशती श्वेत्या—आगात् अस्याः सदनानि कृष्णा—आरैक्—उ समानबन्धू अमृते अनूची आमिनाने द्यावा वर्णं चरतः ॥

पदार्थः—(रुशद्वत्सा रुशती) ज्ञानप्रकाशक वेद है वक्ता जिसका ऐसी परमात्मज्योति चमचमाती हुई (श्वेत्या—आगात्) निर्मल वाणी शुभ्ररूपा मुझ उपासक में साक्षात् हो गई—होती है (अस्याः सदनानि कृष्णा—आरैक्—उ) इसके स्थानों—'मन, बुद्धि, चित्त, अहङ्कार' को पापवासना ने रिक्त कर दिया (समानबन्धू) ये दोनों परमात्मज्योति और पापवासना समान आश्रय वाली—आत्मा में अनुभूत होने वाली (अमृते) संसार में सदा रहने वाली (अनूची) एक दूसरे के पीछे अनुगत होती है—पर्याय से अनुभूत होती है (आमिनाने द्यावा वर्णं चरतः) एक दूसरे की तुलना में आई हुई अपने अपने घने ज्ञानप्रकाश और घने पापभाव को प्राप्त होती हैं ॥ २ ॥

१७५१. समानो अध्वा स्वस्त्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे। न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ ३ ॥

पदपाठः— समानः सम् आनः अध्वा स्वस्त्रोः अनन्तः अन् अन्तः तम् अन्यान्या अन्या अन्या चरतः देवशिष्टे देव शिष्टेइति न मेथेतेइति न तस्थतुः सुमेके सु मेकेइति नक्ता उषासा समनसा स मनसा विरूपे वि रूपेइति ॥ ३ ॥

अन्वयः—स्वस्त्रोः समानः—अध्वा तं देवशिष्टे—अन्या—अन्या चरतः नक्तोषासा विरूपे समनसः सुमेके न मेथेते न तस्थतुः ॥

पदार्थः—(स्वस्त्रोः) परमात्मज्योति और पापवासना दोनों बहिन जैसियों का (समानः—अध्वा) समान अनन्तमार्ग है परम्परा से प्रवाहरूप (तं देवशिष्टे—अन्या—अन्या चरतः) उसको मन[1] द्वारा प्रेरित या लक्षित दोनों भिन्न—भिन्न हुई कार्य करती है—अपवर्ग—मोक्ष और भोग—संसार में ले जाती है (नक्तोषासा) नक्त—नअक्त—जिसमें कल्याण नहीं सूझता, वह पापवासना और उषाबोध देने वाली

१. "मनो देवः" [गो० १.२.१०]।

परमात्मज्योति दोनों (विरूपे) भिन्न-भिन्न रूप वाली—वस्तु को अलग अलग निरूपित करने वाली (समनसः) एक मन से अनुभूत होने वाली (सुमेके न मेथेते न तस्थतुः) समानकाल संवत्सर में[1] हिंसित नहीं करते न ठहरते हैं—उपासक में परमात्मज्योति भोगी नास्तिक में पापवासना चलती रहती है ॥ ३ ॥

तृतीय तृच

ऋषिः—अत्रिः[2] (इस जन्म में तृतीयधाम मोक्ष को प्राप्त करने योग्य हो जाने वाला उपासक)॥ देवता—अश्विनौ (ज्योतिःस्वरूप परमात्मा एवं आनन्दरसरूप परमात्मा)॥ छन्दः—गायत्री ॥

१७५२. आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥ १ ॥

पदपाठः— आ भाति अग्निः उषसाम् अनीकम् उत् विप्राणाम् वि प्राणाम् देवयाः देव याः वाचः अस्थुः अर्वाञ्चा नूनम् रथ्या इह यातम् पीपिवांसम् अश्विना घर्मम् अच्छ ॥ १ ॥

अन्वयः—उषसाम् अनीकम्-अग्निः आ भाति विप्राणां देवयाः-वाचः-उदस्थुः अश्विना रथ्या नूनम् अर्वाञ्चा इह पीपिवांसं धर्मम् आयातम् ॥

पदार्थः—(उषसाम्) कामनाओं का[3] (अनीकम्-अग्निः) आधार ज्ञानप्रकाश-स्वरूप परमात्मा (आ भाति) उपासक आत्मा में समन्तरूप से भासित होता है—साक्षात् होता है, जिसको (विप्राणां देवयाः-वाचः-उदस्थुः) ब्राह्मणों—ब्रह्मज्ञानियों—उपासकों की[4] देव तक जाने वाली—स्तुतिवाणियाँ उसमें आश्रित होती हैं वही (अश्विना) ज्योतिःस्वरूप एवं आनन्दरसरूप परमात्मन्! तू (रथ्या) रमणीय मोक्षधाम के स्वामिन्! (नूनम्) निश्चय (अर्वाञ्चा) इधर प्रवृत्त हुआ (इह) इस जीवन में (पीपिवांसं धर्मम्) प्रवृद्ध अध्यात्मयज्ञ को (आयातम्) भलीभाँति प्राप्त हो ॥ १ ॥

१७५३. न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वे ऽवसागमिष्ठा प्रत्यवर्त्तिं दाशुषे शम्भविष्ठा ॥ २ ॥

---

१. "सुमेकः संवत्सरः" [श० १.७.२.२६]।
२. "अत्रैव तृतीयमृच्छतेत्युचुस्तस्मादत्रिः" [निरु० ३.१७]।
३. "उषा वष्टेः कान्तिकर्मणः" [निरु० १२.६]।
४. "ब्राह्मणा ह वै विप्राः" [जै० ३.८४]।

पदपाठः— न संस्कृतम् सम् कृतम् प्रमिमीतः गमिष्ठा अन्ति नूनम् अश्विना उपस्तुता उप स्तुता इह दिवा अभिपित्वे अभि पित्वे अवसा आगमिष्ठा आ गमिष्ठा प्रति अवर्त्तिम् दाशुषे शम्भविष्ठा शम् भविष्ठा ॥ २ ॥

अन्वयः—उपस्तुता-अश्विना संस्कृतं न प्रमिमीतः इह अन्ति नूनं गमिष्ठा दिवा-अभिपित्वे अवसा आगमिष्ठा अवति प्रति दाशुषे शम्-भविष्ठा ॥

पदार्थः—(उपस्तुता-अश्विना) पास से स्तुत किया गया ज्योतिःस्वरूप एवं आनन्दरसरूप परमात्मा (संस्कृतं न प्रमिमीतः) सम्पन्न अध्यात्मयज्ञ को हिंसित नहीं करता है अपितु बढ़ाता रक्षित करता है (इह) इस अध्यात्मयज्ञ में (अन्ति नूनं गमिष्ठा) समीप—आन्तरिक भाव से निश्चय प्राप्त होने वाला है (दिवा-अभिपित्वे) दिन के अभिप्राप्त—उभयतः प्राप्त—प्रातःकाल और सायंकाल में (अवसा) रक्षण साधन से (आगमिष्ठा) समन्तरूप से प्राप्त होने वाला है (अवति प्रति) वृत्तिरहित चित्त को लक्ष्य कर (दाशुषे) समर्पित करने वाले उपासक के लिये (शम्-भविष्ठा) कल्याणरूप होने वाला है ॥ २ ॥

१७५४. उता यातं सङ्गवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य। दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ॥ ३ ॥

पदपाठः— उत आ यातम् सङ्गवे सम् गवे प्रातः अह्नः अ ह्नः मध्यन्दिने उदिता उत् इता सूर्यस्य दिवा नक्तम् अवसा शन्तमेन न इदानीम् पीतिः अश्विना आ ततान ॥ ३ ॥

अन्वयः—अश्विना उत-आयातम् सङ्गवे प्रातः अह्नः-मध्यन्दिनं सूर्यस्य-उदिता दिवानक्तम् शन्तमेन-अवसा-आयातम् इदानीं पीतिः न-आततान ॥

पदार्थः—(अश्विना) हे ज्योतिःस्वरूप एवं आनन्दरसरूप परमात्मन्! (उत-आयातम्) हमें आ—प्राप्त हो (सङ्गवे) जिसमें सूर्यकिरणें सूर्य में मिल जाती हैं या गौएँ जङ्गल से चरकर घर में प्राप्त होती हैं उस ऐसे सायं समय में, तथा (प्रातः) प्रातःकाल में (अह्नः-मध्यन्दिनं) दिन के मध्याह्न में (सूर्यस्य-उदिता) सूर्य के उदय होने पर (दिवानक्तम्) दिन रात में जब भी (शन्तमेन-अवसा-आयातम्) कल्याणकारी मार्ग से आ—प्राप्त हो (इदानीं पीतिः न-आततान) इस समय विषय पान—भोग को उपासक नहीं सेवन करता है ॥ ३ ॥

पञ्चम खण्ड

प्रथम तृच

ऋषिः—गोतमः (परमात्मा में अत्यन्त गतिशील उपासक)॥ देवता—उषाः (परमात्मज्योतिः)॥ छन्दः—जगती॥

१७५५. एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते। निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः॥ १॥

पदपाठः— एताः उ त्याः उषसः केतुम् अक्रत पूर्वे अर्द्धे रजसः भानुम् अञ्जते निष्कृण्वानाः निः कृण्वानाः आयुधानि इव धृष्णवः प्रति गावः अरुषीः यन्ति मातरः॥ १॥

अन्वयः—एताः-त्याः-उषसः-उ रजसः-पूर्वे-अर्धे भानुम्-अञ्जते केतुम्-अक्रत धृष्णवः-निष्कृण्वाना-आयुधानि-इव अरुषीः-गावः-मातरः प्रतियन्ति॥

पदार्थः—(एताः-त्याः-उषसः-उ) यह वह ही परमात्मज्योति[१] (रजसः-पूर्वे-अर्धे) रञ्जनात्मक भोगापवर्गरूप फल के श्रेष्ठ तथा समृद्ध[२] स्थान—मोक्षधाम में (भानुम्-अञ्जते) प्रकाश अध्यात्म को युक्त करती हैं (केतुम्-अक्रत) मुक्तात्मा को प्रज्ञानमय बनाती है (धृष्णवः-निष्कृण्वाना-आयुधानि-इव) जैसे शत्रुधर्षणशील अपने शस्त्रों को चमकाते हुए दृष्टिगोचर होते हैं ऐसे (अरुषीः-गावः-मातरः प्रतियन्ति) आरोचन—प्रकाशमान ज्ञानरश्मि सबके निर्माण करने वाली परमात्मज्योति भोगरूप संसार के निर्माणार्थ पुनः प्राप्त होता है॥ १॥

१७५६. उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत। अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः॥

पदपाठः— उत् अपप्तम् अरुणाः भानवः वृथा स्वायुजः सु आयुजः अरुषीः गाः अयुक्षत अक्रन् उषासः वयुनानि पूर्वथा रुशन्तम् भानुम् अरुषीः अशिश्रयुः॥ २॥

अन्वयः—उषासः-वयुनानि पूर्वथा-अक्रन् रुशन्तं भानुम्-अरुषीः-अशिश्रयुः स्वायुजः-अरुषीः-गाः-वृथा-अयुक्षत भानवः-अरुणाः-उदपप्तन्॥

पदार्थः—(उषासः-वयुनानि पूर्वथा-अक्रन्) परमात्मज्योति उपासक के मन,

१. "पूजार्थं बहुवचनम्" [निरु० १२.७]।
२. "अर्धः-ऋध्नोतेर्वा" [निरु० ३.९]।

बुद्धि, चित्त, अहङ्कार को[1] पूर्ववत् वृत्तिरहित शुद्ध कर देती है (रुशन्तं भानुम्-अरुषी:-अशिश्रयु:) निर्मल प्रकाशमान ज्ञानवान् आत्मा को रोचमान परमात्मज्योति आश्रित हो जाती है—प्राप्त हो जाती है (स्वायुज:-अरुषी:-गा:-वृथा-अयुक्षत) स्वयं युक्त होने वाली आरोचमान ज्ञानरश्मि अनायास स्वभावत: उपासक में युक्त हो जाती है (भानव:-अरुणा:-उदपप्तन्) ज्ञान से भासमान आरोचमान हुई—उपासकजन का मोक्षधाम की ओर उत्थान कराती हैं ॥ २ ॥

१७५७. अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः। इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥ ३ ॥

पदपाठः— अर्चन्ति नारीः अपसः न विष्टिभिः समानेन सम् आनेन योजनेन आ परावतः इषम् वहन्तीः सुकृते सु कृते सुदानवे सु दानवे विश्वा इत् अह यजमानाय सुन्वते ॥ ३ ॥

अन्वयः—नारी:-विष्टिभि: समानेन योजनेन परावत: अपस: 'अपस्वन्त:' सुकृते सुदानवे सुन्वते यजमानाय इषं वहन्ती: विश्वा-इत् ॥

पदार्थः—(नारी:-विष्टिभि:) नेत्री देवियां निविष्ट स्वभाव वाली—प्राप्त प्रवृत्तियों से जैसे (समानेन योजनेन) समान धर्म्य प्रकार से (परावत:) परागत दूरदेश से[2] आए (अपस: 'अपस्वन्त:') कर्मवान् की सेवा करती है ऐसे (सुकृते सुदानवे) सुकर्ता—सुगम कर्मकर्ता तथा शोभनदानी—आत्मदानी (सुन्वते) उपासनारस निकालने वाले—(यजमानाय) उपासक आत्मा[3] के लिये (इषं वहन्ती:) कामना को वहन करती—प्राप्त करती हुई (विश्वा-इत्) सब सुखों को प्राप्त कराती है ॥ ३ ॥

द्वितीय तृच

ऋषिः—दीर्घतमाः (दीर्घकाल से अज्ञानान्धकार जिसमें है या आयु को चाहने वाला[4]) ॥ देवता—अश्विनौ (ज्योतिःस्वरूप एवं आनन्दरसरूप परमात्मा) ॥ छन्दः—गायत्री ॥

१७५८. अबोध्यग्निर्ज्म उदेति सूर्यो व्यू३षाश्चन्द्रा मह्यावो अर्चिषा। आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत् पृथक् ॥ १ ॥

---

१. ''वयुनं प्रज्ञानम्'' [निघं० ३.९]। २. ''परावत: परागताद्वा'' [निरु० ११.४८]।
३. ''आत्मा यजमान:'' [कौ० १७.७]।
४. ''आयुर्वै दीर्घम्'' [तां० १३.११.१], ''तमु कांक्षायाम्'' [दिवादि०]।

पदपाठः— **अबोधि अग्निः ज्मः उत् एति सूर्यः वि उषाः चन्द्रा महो आवः अर्च्चिषा आयुक्षाताम् अश्विना यातवे रथम् प्र असावीत् देवः सविता जगत् पृथक् ॥ १ ॥**

अन्वयः—अश्विना रथे यातवे आयुक्षाताम् 'आयुक्षाथाम्' ज्मः–अग्निः–अबोधि सूर्यः–उदेति मही चन्द्रा–उषाः–अर्चिषा वि–आव सविता देवः पृथक्–जगत् ॥

पदार्थः—(अश्विना) हे ज्योतिःस्वरूप एवं आनन्दरसरूप परमात्मन्! तू (रथे) संसार रथ में (यातवे) उसे चलाने के लिये (आयुक्षाताम् 'आयुक्षाथाम्')[१] समंतरूप से युक्त होता है तो (ज्मः–अग्निः–अबोधि) पृथिवी का अग्नि—पार्थिव अग्नि जागता है—प्रकट होता है (सूर्यः–उदेति) सूर्य उदय होता है (मही चन्द्रा–उषाः–अर्चिषा वि–आव) महती आह्लादकारी—प्रसन्नता देने वाली उषा प्रभातज्योति तेज के साथ प्रकट होती है (सविता देवः) वायु[२] देव (पृथक्–जगत्) पृथक्–पृथक् जगत्—जङ्गम श्वास लेने वाला गति करने वाले प्राणीमात्र को प्रकट करता है ॥ १ ॥

१७५९. **यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम्। अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ २ ॥**

पदपाठः— **यत् युञ्जाथेइति वृषणम् अश्विना रथम् घृतेन नः मधुना क्षत्रम् उक्षतम् अस्माकम् ब्रह्म पृतनासु जिन्वतम् वयम् धना शूर साता शूर साता भजेमहि ॥ २ ॥**

अन्वयः—अश्विना यम्–वृषणं रथं युञ्जाथे नः मधुना घृतेन क्षत्रम्–उक्षतम् अस्माकम् 'अस्मासु' पृतनासु ब्रह्म जिन्वतम् शूरसाता वयं धना भजेमहि ॥

